व्याकरण प्रलाकन

काथय

सभ्याभरणपञ्जिकाविवृतिर्भ सूत्रमाला

६२ पत्राणि

१२६ २४

व्याकरणं

सन्ध्याभरणटीकामयूखमाला

२४७२

सं॰ प्रा॰ ... | उपकारप्र॰

५१

श्रीगणेशाय नमः ॥ अथोपकारप्रकरणं सापेक्षत्वेऽप्यवयवैः परार्थपरतामध्यापिता ये चिरं हंते तान्स्तुतिगोचरं नगम
याम्येवं न निंदामि च ॥ तेजीवं नु परं परार्थपरतास्वाचार्यकं स्वीकृतं ये यांत पूरुषस्य तेऽवयवैः स्वार्थादरे राणोऽक्षिते ॥ १ ॥ इह खल्व
न्यग्रोधाविस्मादिषु द्वंद्वपदेषु खल्वपदस्थैस्यस्वार्थमिलितपरार्थेसति न्यग्रोधपदस्यस्वस्वार्थमिलितलत्वार्थ इति वैया
करणमतं साहित्येऽलत्वलोतिमीमांसकाभिमतेऽदमुच्यते ॥ ये द्वंद्वावयवैः परार्थपरतां शिक्षिताः स्वार्थाविरोधेन परार्थं साधयं
तीति यावत् ॥ तान्नन्दामो नापि क्षमः ॥ यतः परार्थपरा ननिंद्याः स्वार्थपरा नस्तुत्याः सेषु चोभयं वर्त्तते इति नोभयविषयो
इत्यर्थः ॥ एतेन सामान्यपुरुषाउक्ताउत्तरा द्वंद्वे नोत्तमाना हा [illegible] विवक्षिता ॥ आचार्यस्य भाव आचार्यकं वोपधादिति वुञ्राखु
पुंशोभनमाचार्यकं स्वाचार्यकं परार्थपरता यां स्वाचार्यकं परार्थपरतास्वाचार्यकं खुपदेन उपदेशस्याति प्रशंसनीय
त्वान्नस्वाचार्यकं शोभनं द्वंद्वपदेषु नुनेव मिश्रकं भवति ॥ राजपुरुष इत्यादौ तत्पुरुषे जहत्स्वार्था वृत्तिरिति पक्षे राजपदस्य
परोयः पुरुषशब्दस्तदर्थो यो वाक्यावस्थायामनुक्तस्तदभिधायकत्वात्परार्थाभिधानं वृत्तिरिति वृत्तिलक्षणात्परार्थ
परता स्वार्थपरित्यागेन ॥ तथा च स्वार्थतिरस्कारेण परार्थपराणां सतां तत्पुरुषपदेस्वत्राचार्यकं कृतमित्युच्यते ॥ ननु य
दिजहत्स्वार्थावृत्तिस्तदा राजपुरुषपदयोर्वाचवाचकशब्दयोरिव पर्यायत्वमेव स्यान्नविशेषणत्वं राज्ञः स्यादिति चेत् ॥ य
था राज्ञा हूत्ये नियुक्तस्तात्स्वं कर्म जहाति तथा स्वेनार्थेन वशीकृतस्यार्थांतरोपादानासंभवाद्वश्यं जहाति राजपदं

राम
१

त्तौ स्वार्थमित्याश्रयणीयं किंतु यथा तक्षा राजकर्मणि प्रवृत्तस्तद्विरोधितक्षकर्मैव जहाति न त्वसितादीनि प्राणिध
र्मभूतानां तेषां त्यागे राजकर्मविच्छित्तेरभावात् तथा स्वार्थं जहदपि राजपदं षः परार्थ्यविरोधी स्वार्थस्तमेव जहाति न वि
शेषणत्वमपि तत्त्यागे च परोपकारासंपादनादनुपादानमेव तस्य स्वास्य प्रयोजनाभावात्। नन्वेवं वाक्येपि राज्ञो यो
विशेषणांशस्तत्रापि त्याविशेषप्रसंग इति चेत्। उच्यते। समस्तस्य राज्ञः पुरुष इति वाक्ये राजपदस्य विशेषणांशे संबंधसम
वाधिगमे सामर्थ्यमविहतं। वृत्तौ तु उपसर्जनभावं गतेन स्वार्थेन प्रधानमुपकृतमिति ब्रह्मणाश्व। निर्विशेषस्य विशे
षणप्रतिपत्तिसामर्थ्याभावश्च पाचत्यागमात्रमभिसंधायाजहत्स्वार्थत्वमुच्यते न तु सर्वात्मना त्यागस्तदिदमपि सं
धायोक्तं स्वार्थौ हरेणोपेक्षितेरिति। स्वार्थादरस्तु प्राधान्यमेवेति दिक्। अजहत्स्वार्था वृत्तिरिति पक्षे तु विद्यमानस्वार्थ
योर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोतीति दोषस्तत्रोत्तरं। राजपुरुष इति संघाताद्विभक्त्योत्पत्तव्यं। संघातेन च विशिष्ट
एकत्वसंख्यायुक्तोर्थः प्रतिपाद्यत इति तदाश्रयमेकवचनमेव भवति न तु गुणभूतावयवसंख्याश्रयं द्विवचनमिति। अत्र
शाब्दा नित्यत्ववादिनो वाक्यादेव वृत्तिर्विकल्पेन निष्पद्यते वृत्तेः स्वतंत्रलक्षणमिति मन्यन्ते। नित्यत्वपक्षे तु वृत्तिवाक्ये नित्ये विवि
क्तविषये राजपुरुषादीनि वाक्यविषयपदसरूपावयवानि रघुपतिपदप्रयोजपराशुवानां शरीराणि ववर्णवदनर्थका
वयवान्येव तत्त्वतो निरवयवानि केवलमसत्याः प्रक्रियायामा। श्रित्य व्युत्पाद्यंत इति तेषां। अत्र ढेढेयदुक्तं त ५ क्रम

दारश्रंशंसायां। समर्थानां ये षां किमपि न पदानामिव भवेत्परार्थसामर्थ्ये किमहं कषाया तद्धतधियां। स्वमुखत्वं दत्ते सु
पश्वयश्रामं त्रितमिवापरस्मै तस्मै स्यात् क्रशालमिहकस्मै च न चि रं॥ २॥ ते च ते हतधियश्च तद्धतधियस्तेषां हतधियां कुर
६३ दृष्टेन विनष्टबुद्धीनां अहङ्कृतिरवेदे किं कषायाकषायाविचलु पापानामपलमश्रेयः सेयं तदिति स्यायान्ते षां वान्तो पि न वान्ते ये त्व
लमलं तयेत्यर्थः केत इत्यत आह। समर्थानामिति। संगतार्थानामित्यर्थः। अर्थ्यते इत्यर्थशब्देन धनजनविद्यादिक मुच्य
ते। परार्थे परेषे असमर्थास्तदर्थे न सामर्थ्यं धनजनविद्यादितरप कृतये षेषां न भवेदित्यर्थः तत्र दृष्टान्तः पदानामिवेति।
२ यथा राज्ञः पुरुष इत्यादि पदानां सामर्थ्य[illegible]म समर्थस्य कस्य चिदपि पदस्य नो पयुज्यते तथायेषां किं ते षां कषाये त्यर्थः।
तस्याच कषायात्र अविषयायेकथ्यते आशीर्विषयाइतिभावः। ननु पदानां किं सामर्थ्यं नाम उच्यते राज्ञः पुरुष इति
वाक्ये परस्परव्यपेक्षा सामर्थ्यं। न च स्वं स्वमर्थं प्रति गुणभूतयोः शब्दयोः का नाम परस्परापेक्षेति वाच्यं। प्रमातृग
ताया व्यपेक्षाया अर्थे समारोपाच्छब्दानां संस्कार इत्यर्थारोपितायास्तस्याः शब्देषु पचारात्। तत्र राज्ञः पुरुष इत्युक्ते रा
जा पुरुषमपेक्षते ममायमिति पुरुषोप्यहमस्येति राजानमपेक्षत इत्येषा व्यपेक्षा तयोरभिसंबन्धस्य नु षष्ठी वाचि राम
का भवति राजपुरुष इति वृत्तौ त्वेकार्थीभावः सामर्थ्यं वाक्ये हि राज्ञः पुरुष इत्यत्र राज्ञ इति पदं राजार्थमेव तत्संबन्धि २
विशेषणाभावमापन्नमभिदधाति पुरुषपदं पुरुषार्थमात्राभिधायकमपि भिदधातीत्यस्मिन्पार्थ गर्थ्यं वृत्तौ तु राजशब्दो

त२

पि पुरुषा थमाचष्ट इति द्वयोरेकार्थीभावो भवति । तत्र च भेदनिवृत्तौ तदधिष्ठानस्य संबंधस्यांतर्भावो भवति भवति
च तत्र स्वाभाविकी षष्ठी निवृत्तिः सैव प्रत्ययलक्षणेन षिद्धये सुपो धातुप्रातिपदिकयोरिति शास्त्रेणान्वाख्यायते । वाक्ये तु भेदाधिष्ठानस्य
संबंधस्य प्रत्याययितव्यत्वाद्विभक्त्या विना च तस्य प्रत्याययितुमशक्यत्वात्सुपो निवृत्तिर्नास्ति । तथा च सुपो भावाभावा सं
वाक्यसमासयोरर्थस्य भावो भावो वानुयातव्यः । सत्येकार्थीभावे व्यवधानं देवदत्तपद्मध्य इव राजपुरुष इति पदमध्ये पदां
तरस्य प्रवृत्ते सुमध्यत्वात्र दृष्टं सति त्वर्थभेदे राज्ञो भार्यापुरुषो देवदत्तस्येत्यादौ व्यवधानमवलोकितं तथा राज्ञस्त्र
ड्स्य पुरुष इति तथा वृत्तावर्थाभेदनिवंधनो नियतपौर्वापर्यः पदप्रयोगो राजपुरुष इति । वाक्ये तु भेदाद्भवति पुरुषो रा
ज्ञ इत्यनियतपौर्वापर्यप्रयोगः एवमर्थभेदः स्वरभेदो दृश्यते यथा देवदत्त गामभ्याजेत्यादौ कारकाउत्तरयोर्दत्तश्रुतयो
राशिष्यं तदुदात्त इत्यर्थकेन कारकाद्दत्तश्रुतयोरेवाशिषीत्यनेन देवा एनं देयो घरित्याशिषे देवदत्तशब्दोंतोदात्तः गो
शब्दः फिट्स्वरेणांतोदात्तः अभ्याजेत्यत्र तिङः तिङ् इति तिङनुदात्तः निपाता आद्युदात्ता इत्यप्युदात्तः भिगतावित्यत्नि
राद्युदात्तः तत एव राज्ञः पुरुष इति वाक्ये राजन्शब्दस्य कनिन्प्रत्ययांतत्वे नद्वित्यादिर्नित्यमिति पुरुषशब्दस्य फिट्स्वरे
तिः णाद्युदात्तत्वेऽपि पदे आद्युदात्ते राजपुरुष इत्येकार्थीभावे तु समासांतोदात्तत्वमेक एव स्वर इत्यमयं एकार्थीभाव
कृतो विशेषस्तत्र राजपुरुषमानय राज्ञः पुरुषमानयेति वृत्तिवाक्ययोरेक एव विशिष्टोर्थः प्रतीयत इति कथं साम

स॰उ॰

॥३॥

र्थभेदे कथं च षष्ठ्यर्थगर्पिता वाक्ये सर्वत्र राजसंबंधि पुरुषस्यैवानयनप्रतीतेरिति न शंकनीयं। शतं ब्राह्मणा मोऽर्पिता
ऽयं२ ब्राह्मणानां शतं मे[illegible]तामित्यादौ सत्यपि कार्यस्य भेदे शब्दार्थभेदो यथा तथेहापि संभवादेकार्थीभाव कृतविशेषाणा
मभिधानाच्चानन्तु सुपो धातुप्रातिपदिकयोरुपसर्जने पूर्वं समासस्यो तत्र हान्नोभवतीति वचनं कृतं सुब्लोपादिकं चानि
3 वाराणां पार्थभेदानुपापकं। अस्ति हितस्पुरुषे कृतिबहुलमिति सुब्लोपेपि गोषु चर इत्यादावर्थस्याभेदः प्रयोगस्यानि
यमोपि हन्तावेताद्यौ आघंताविस्यादौ दृष्टः वाक्येपि प्रयोगनियमो धव खदिरश्च नतु भवति खदिरश्च धवश्चेति।
तीक्ष्णोन परशुना [illegible] छिन्नीसैवाक्ये प्येकस्य पशु वामंत्रिते परांगवत्स्वर इत्यनेन तत्तीपांतद्वयस्य परांगवद्भावात्स्व
ति कर्तवेऽइस्य तुमर्थे तवे प्रत्ययस्याद्यावंते चोदात्तद्वयं मंतश्च तवै युगपदित्यनेनार्थाभेदेपि भवति तथा च पयः पयो
जरयतीत्यत्र वाच्यकविभक्तिलोपे प्यर्थभेददर्शनाद्राजपुरुष इत्यत्रापि राजपदस्यैव संबंधाभिधायकत्वादर्थभेदः
किं न स्यादिति कृपणकार्थी भावकृतो विशेष इति चेत्। उच्यते। अयमेकार्थीभावकृतो विशेषो यत्र वाक्ये विभक्त्यर्थान्वि
तस्वार्थाभिधायित्वादुपसर्जनपदानि राज्ञः पुरुषो राज्ञां पुरुष इति संख्याविशेषोचितं स्वार्थं समर्पयेति। वृत्तौ तु स्वार्थीभू राम
तभीव्यप्रधानार्थमभिदधतीस्य भेदैकत्वसंख्यामवगमयेति भेदानां संख्याविशेषाणामवगमेन एकत्वसामान्यरू 3
पेणावस्थानमभेदैकत्वं संख्यायथोक्तं। यथौषधिरसाः सर्वे मधुन्याहितशक्तयः अविभागेन वर्त्तते तां संख्यां तादृशीं वि

डुरिति द्विपुत्रइत्यादौ संख्याविशेषः प्रातिपदिकार्थ एव तावत् कीनइत्यादौ तु एकमनेकार्थे एकवचनइत्यादेशात् मिथ्यांगपमे

कत्वे। एवं ब्राह्मणा ब्रह्मस्य केवलस्थितिरिति वाक्ये व्यक्ताभिधानं भवति। ब्राह्मणकंबलइति समासे तु अंतर्वर्तिनी षष्ठी सम्बं

सोवेति संदेहः। यद्यप्यत्रैतद्वक्तव्यं ऋद्धेः पशोर्देवदत्तस्येत्यत्र वाक्येपि संदेहो भवति पशुगुणस्य देवदत्तस्य च पदर्थे संगी

भूतपशोर्देवाद्वमिति। वृत्तौ तु तत्र व्यक्ताभिधानं भवति ऋद्धपशुर्देवदत्तस्येतित था वनायें विशेषइति चेत् मा भूदयं दृष्टौ

कस्तु विशेषः।। एकार्थ्येव भवति विशेषः भिन्नाः पदार्था वाक्ये इति चशब्दो भेदनिबंधनसमुच्चयद्योतनाय घटश्च पटश्चे

ति प्रयुज्यते। वृत्तौ तु समस्तरूपार्थः प्रादुर्भवतीति भेदनिवृत्तेर्द्योत्याभावइति द्योतकचशब्दस्यापि निवृत्तिरिति टीकायाद्य

पोरुदकवत् विभागः। यत्रान्य एव अवयवार्थान्वितः समुदायार्थ प्रादुरस्ति तितदपेक्षया एकार्थीभावउच्यते। वृत्तिस्तु शब्दांतर

मेव वर्णविरहनर्थकत्वमवयवानां तत्र सादृश्यात् तत्वाधावमायं पदानामाभिरत्यपदव्यगव्यो नामेकार्थीभावइत्युक्तं। अथोत्त

मं पुरुषमनघं तस्मा आशिषं प्रयच्छन्स्तोत्रि शोर्डुलमतां सूचयति। स्वमुखत्वमिति किस्मै विदितिविशिष्याशक्तकपनगुणागो

रवायतस्मै कुशलमाधिव्याधिवैधुर्यरूपादि तत्पर्थः मकरंदस्तत्राह। स्वमुखत्वमिति। यः पुरुषवरः स्वसमुच्चलेस्वसंबंधिम

हत्वमपरस्मै दत्ते सममधिकविनयविराजितस्नेहसुधामधुरावलोकललितालापदानमानादिना निरतिशयगुणागौ

रवख्यापनेन संगं तं येकमपि महांतं करोतीत्यर्थः। तत्र दृष्टांतः आमंत्रितमिव धुपेदिति। सुबंतस्य अपरस्मेनपरम

धिकयिनपविभ्रजितकेस्तुवाममुत्तपसोफललितासोपदानमानोदिनानिरतिशयगुतागरिमरव्याथमेनसंगमनंयेक
मयिमत्तंकारोतीम्यवेभसत्रेस्य्यंतः आवेनितमिवस्तुयेसति। सुवंताय अपरस्मैनपरमपरं पूर्वस्मैइति यावत।उद्वत्व
२३ मुदात्तत्वंतथाच यपामंत्रितपदं सुबंताय पूर्वस्येउदात्तत्वंतंइसर्थः। यद्यपितत्रकुंडेनाटनपरशुनावृश्चन्निसादौसु
वेतस्यामंत्रितेपरेपरांगवद्भावेमहत्यिंडवदेकीभावेविदधतासुवामंत्रितेपरांगवत्स्वरेइति सूत्रेणाकुंडेनेत्यादिपूर्वसुबंत
स्यपरामंत्रितताद्गत्म्यातिदेशात्समुदायस्यैकामंत्रितत्वमापादयताकुंडेनेत्यादिपरात्परत्वेनप्राप्तामामंत्रितनिघातं नि
वार्यसुबंतस्यामंत्रिताद्युदात्तत्वंक्रियतेनत्वामंत्रितपदेनक्रियतेतथाप्यामंत्रितेप्राप्तमुदात्तत्वमामंत्रितसंनिधौसुबं
तेभवतिनान्यथेत्यन्वयव्यतिरेकाभ्यामामंत्रितेनदीपतइत्युपचारादभिधीयतइति दिक्। अत्रकल्पमधिकमुक्तंस
त्यशंसाचो॥यद्दिष्क्रियोजेचिरमनुस्मृतानामुपकृतिं विधातुंतद्वीतिविविदिषुरशंकंघनरसोत्तदाचार्यैकुर्याद्नु
स्मृतमुवामंत्रितपदंपदाधत्तेतत्रस्वाविलसदुदात्तश्रियमपि। चिरकालमाश्रितानामुपकृतिमुपाकारंयोविधातुमि
च्छेदुपकारःकपाराणामविशेषेयइतिचयो जिज्ञासुर्भवति। असौघृमानूलदितिशाघ्रप्राप्तिरूपामंत्रिपदमाचार्येकु राम
र्यादुपकारःप्रकारमस्माच्छिद्देदित्यर्थः। अनुस्मृतंसुपसुबंतपदंहृयेमित्यनुस्मृतसुविलामंत्रितविशेषणंसुबंतप ४
रास्थितामित्यर्थः। तत्किमित्यतआहृयदाधत्तइतियदामंत्रितपदंस्वाभ्मिनविलसंतींप्राप्तामुदात्तश्रियमुदात्तस्वरशो

मांपरांगवऋावान्तत्रसुबंतेमव्राणांराजान्त्रितिमद्गपदेआधत्नेआरोपयीत्यर्थः तथाचस्वकीयामपिमह् तीम।पिश्रियमर्पि
पित्वाचिरमाश्रितानांदारिद्र्यमेवह्लकरणीयमितिभावः॥ आनर्थक्यमुपेद्दृतेचिरतरंयःस्वाश्रितानामिहव्यर्थे तत्पुरुषोय
थासपुरुषोप्यर्थान्वितोजीवति। तस्मात्पुरुषःपरमेधवतांवझतरंसाधोर्बहुव्रीहिवर्धस्वार्थेगुणतांनयत्रनुसरत्यन्यथां। थ
मेकंततः४॥ अखंडोप्यएवसमासार्थः पूर्वोक्तपद्यो मूलस्यविदानर्थकामितिसिद्धांताद्यथातत्पुरुषःस्वाश्रितानांपद
नामानर्थक्यमुपेद्दृतेतथायःस्वाश्रितानामानर्थक्यमर्थराहित्यंदारिद्र्यमुपेद्दृतेसपुरुषोर्थान्वितोपितेनार्थेनपुरुषा
र्थमसाधयन्निष्फलेवजीवतीत्यर्थः यथाबहुव्रीहिसमासःस्वार्थंगुणतामप्रधानतांनयत्यतितमामन्यार्थमन्यप
दार्थमेवप्रधानंतयाकरोतितथायःस्वार्थंस्वस्यधनस्यार्थेप्रयोजनंलोकत्रसिद्धंयदुपभोगरूपंतदमुख्यतांप्राप
नृ५ यैततोधनादेकंमुख्यमन्यार्थेपरार्थेसंपादयतितस्यसाधोर्वद्धतरमाधुरेवतांवर्धतामित्यन्वरार्द्धार्थः अनेकम
न्यपदार्थइत्यत्रान्यग्रहणमकृत्वायदिपदार्थेबहुव्रीहिरित्युच्यतेततद्ययघप्यंतरंगत्वात्स्वपदार्थेसमाससिद्धवन्य
पदार्थएवपदार्थग्रहणसामर्थ्याल्लब्धुंशक्यःपदार्थग्रहणाद्व्याप्तिसमाश्रयणेस्वपदार्थान्यपदार्थयोर्बहुव्रीहिर
न्यपदमंतरेणाप्यादित्यापिचवक्रमशक्तेस्वपदार्थेतत्पुरुषस्यबाधकत्वादेकसंज्ञाधिकारेसंज्ञयोःसमावेशाभा
वात्तथाप्यन्यपदाकरणेयथास्वपदार्थेराजपुरुषइत्यादौवहुव्रीहिस्तत्पुरुषोबाधतएवंविशेषानुपादानीत्रीलोत्व

स० उ०
॥५॥

त्वं सर इत्यत्रान्यपदार्थेऽपि समानाधिकरणास्तत्पुरुषो शङ्केव कर्मधारयो बाध्येत बहुव्रीहिं च निरवकाशो बहु-
व्रीहिः। कण्ठेकाल इत्यादौ व्यधिकरणपदे तस्य सावकाशत्वात्। अन्यग्रहणेनुसरति परत्वाद्बहुव्रीहिः स्वपदार्थे सा-
वकाशं तत्पुरुषं बाधेत इत्येतस्य ग्रहणं पदग्रहणमकृत्वा पदान्यार्थ इत्युच्येत तदा वाक्यार्थे वर्त्तमानानां नञ्ग्रहः
संति यथा मे माता तथा मे पितेत्यादिपदानां समासः स्यात्तेन नघ्नो सिध्यासु प्रतिकेन चिदुक्तस्य ग्राहाः संतीत्य-
स्य मा भूदासीरित्यस्मिन्वाक्यार्थे वृत्तिः स्यादितिकेनचिदुक्तं यथा सुरक्तकला माता तथा मे पिता पीत्यमिजनं स्रुच्छिर-
पि सुप्तानं किं बाधेन ते नेत्व मिप्रायेणोक्तानां पद्यान्यर्थे तीनां पदानां सुप्तांतमोद्दृत्येतद्वाक्यार्थे वृत्तिरिति पदग्रहणं।
अनेकग्रहणं तु सुसूक्ष्मजटकेशेन सुनताजिनवाससे त्वा हो ध्वरवादिस्य पलाशादि तिष्ठन्द्वै बहूनां समाससिद्धर्थ-
मेन्यथा सुपुष्टेति सुत्रे संख्याया विवक्षितत्वात्तत्पुरुषादिवत् द्वयोरेव स्यात्। तत्र सुपुष्ट सूक्ष्माजलाः केशाय स्येति
वत्तुर्णो बैहुव्रीहो आपोः सत्तान्छंदसोर्वङ्कलमिति वङ्कलवचनाद्धस्वत्वं। पद्यासुपुष्टसूक्ष्माजलायेषु तेषु सूक्ष्मजटाका-
द्दशाः केशा यस्येतिपुनर्बहुव्रीहिः एवं सुष्टुनतमाजिनं वासश्राछादनं यस्येति विग्रहः। पञ्चतद्धितार्थेनंतर पदे परतो द्वि- रम्
गुविधानं ज्ञापकं बहूनां समासस्येति। तत्राद्यम्हभ्रातरित्यादो द्विगौ सावयवविशेषण् उत्तरपदे परतः समासविधानं बहू- ५
नां समासस्य ज्ञापकमिति। तदपि न तत्पुरुषेति प्रसंगात्। यदपि चित्रगुरित्यत्रोत्तरपदस्याप्युपसर्जनसंज्ञाप्रयोज-
सावकाशत्वेनेतस्य ज्ञापकत्वाभावात्। यदपि दिशः समानाधिकरणेनसमा २

नमनेकग्रहणात्स्यात् सति हि यस्मिंस्तु बिसे वानुवर्त्तेते न तु सुपेति तत्रिहृत्यर्थत्वात्तस्य । ननु अश्वो न्तरमदृष्ट्वा नेकग्रहणं नैव
प्रत्यय्य त इति तत्समासः शास्त्रे प्रथमानिर्दिष्टमित्युपसर्जनगोशब्दे ह्रस्वसिद्धिरिति । तदपि ना चित्रा गुः स्थिष्ठति चित्रगु
पश्येति चित्रा गावो यस्येति त्वेवं वर्त्तिपदयोर्नित्यप्रथमान्तत्वादन्यपदार्थस्य प्रधानस्यानेकक्रियायोगात्तन्नानाविभ
क्तियोगे प्येकविभक्तौ सुपसर्जनसंज्ञायाः सिद्धत्वात् । ननु यथावार्थे द्वंद्वविधानात् द्वंद्वे च शब्दस्योक्तार्थस्य प्रयोगो न भ
वति तथेहान्यपदार्थे बहुव्रीहिर्विधीयते वे चित्रगुर्देवदत्त इत्युक्तार्थस्य देवदत्तपदस्य प्रयोगो न प्राप्नोतीति चेत् । चित्रगु
शब्देन चित्रा गावो यस्य तन्मात्रस्याभिधानात् कश्चित्रगुर्देवदत्त इति विशेषानुप्रयोगस्यावश्यकत्वात् । चित्रा गावो स्य दे
वदत्तस्येति विशिष्टेन्यपदार्थे बहुव्रीहिरिति तु वक्तुमयुक्तं वृत्तिवाक्ययोस्तुल्यप्रयोगाभावात्समासस्य च शब्दस्य शक्तिस्व
भावादन्यपदार्थसामान्य एव शक्तेः प्रक्रियायामपि सामान्येनैव विग्रहस्य कर्त्तुं युक्तत्वात् । हं तेवं चित्रगुः कश्चिदिति
सामान्यानुप्रयोगो न प्राप्नोतीति चेत् चित्रगुः सर्वो वा कश्चिद्देवदत्तो वेति संदेहे कश्चिदित्युक्ते सर्वत्वात् त्रिसिद्धेर्विशेषे निवृत्ते
कस्य सामान्यस्यापि तत्र विशेषत्वात् । अथ वा पदेन प्रकृतस्यार्थोपसर्जनः प्रत्ययार्थो भिधीयत इति विभक्त्यर्थः संबंधा
दिरेवान्यपदार्थः समासेनाभिधीयते तदा तद्वाचिन्या विभक्तेर्मीनुप्रयोगो भूतपरं तु द्रव्यमनभिहितमिति तद्वाचिनो नुप्र
योगो न वारयितुं शक्यः । कथं तर्हि सत्त्वप्रत्यस्य विभक्त्यर्थस्यालिंगसंख्यानां अवद्वार इति चेत् । गुणवचनानामाश्र

तोलिंगवचनानियथा शुक्लं वासः शुक्ला शाटी शुक्लः कंबलः शुक्लौ कंबलाविति भवति तथाद्रव्यमाश्रितः संबंधादि
गुणेन इति समासस्यापि द्रव्यगतलिंगादियोगस्तत्र यद्यपि चित्रगुशब्देन संबंधोभिधीयते तथाप्यभेदोपचारात्संबंधि
नोभिधानमेवं च द्विष्ठे संबंधे पि प्रधानत्वात्स्वामिन एवाश्रयत्वं व्यवस्थाप्य मिति तत्कृत लिंगसंख्योपपत्तिः। नन्वेवं यथा शुक्ल प्र२
शब्दे न कदाचिद्गुणो गुणी च कदाचिदभिधीयते तथा चित्रगुशब्दे न कदाचित्केवलः संबंधोप्यभिधीयते इति चेत्।। षष्ठ्यादि
6 शब्दैर्धिवनित्यगुणाभिधेयता भविष्यति नहि देवदत्तस्य पडरिति कदापि भवति किंच यादिविभक्त्यर्थस्येव प्रधानस्य ग्रहणं
अभिमतं स्यात्तदानेकमन्यपदार्थोपि इत्यर्थग्रहणं तत्कृपी द्विनाप्यर्थग्रहणाच्छब्दे असंभवादर्थ एव कार्यसंभवादित्यर्थग्रह
णं सङ्ख्यः सलिंगः ससंख्यः पदार्थो यथाभिधीयते त्वेवमर्थेन चैवं यथा बहुव्रीहिणा विभक्त्यर्थोभिहित इति षष्ठ्याहीना
मप्रयोगस्तथा लिंगसंख्ययोरभिधानेन तयोर्वाचकः प्रत्ययान्तस्पृरिति वाच्यं प्रातिपदिकस्य स्त्रियां वृत्ते टावादीनां स्वार्थिकाना
यथासंभव एवमभिहितेपि बहुव्रीहिणा स्त्रीत्वे टावादीनां संभवान्न चित्रगुरिति समासेन प्रातिपदिकार्थमात्रस्य कर्मादिशक्ति
रहितस्योक्ता एकत्वादय इति चित्रगुं पश्य चित्रगुणा कृतमिति कर्मादिगतेकत्वादि इति प्रतिपादनाय वचनसंभवाच्च समासे राम
न संख्याथा अभिधानात्प्रथमापि तर्हि न प्राप्नोतीति चेत्।। न केवला प्रकृतिर्न केवलः प्रत्ययः प्रयोक्तव्य इति नियमस्य पर ६
श्चैव स्यारंभेणलाभात्तामयिकी प्रथमा भविष्यति। समयपरिपालनाय द्वितीयादयोपि तर्हि प्राप्नुवंति प्रथमयैव समय

ता

परिपालनमित्यत्रनियामकाभावादितिचेत्॥कर्मणपेवद्वितीयेप्रत्ययेवंकर्मादिषुद्वितीयादीनांनियतत्वेनतदभावेतद
भावात्॥प्रातिपदिकार्थमात्रस्यप्रथमाविधावुपयोगान्नास्तिशेषत्वमितिशेषलक्षणषष्ठ्यभावः।नन्वेवंद्विवचनेनापिसम
यपरिपालनप्रसंगइतिचेत्।यथात्यत्रैकत्वादिषेकवचनादीनिद्दिष्टानितथैवात्रभवितुंयुक्तमित्येकत्वादौद्विवचनादिन
भविष्यतिततश्चैवंसमर्थयः परिपालितोर्थश्चानुसृतोभवेत्।किंचएकस्मिन्नेकवचनमित्यादौवचनग्रहणस्यप्रयो
जनमेकोद्वौबहवइत्यादिष्विवोक्तेष्वप्येकत्वादिष्वेकवचनंभवत्विति।तथाचसमासोक्तेप्येकत्वेप्रथमास्यात्।तत्रयद्य
पिसंबंधसत्वात्षष्ठीप्रसंगस्तथापिसमासाभिहितःसंबंधोंतर्भूतःप्रातिपदिकार्थतांगतइतिप्रथमैवभवति।चित्रगो
र्देवदत्तस्येतितुषष्ठीवाच्यमधर्मापेक्षभवतिगोरन्यपदार्थसमयःसंबंधस्यैवसमासेंतर्भूतत्वादितिदिक्।अथ
किंसब्रह्मचारीत्यत्रकःसमासःयदिबहुव्रीहिस्तदाकेसब्रह्मचारिणोस्येतिविग्रहेकठोहमितिप्रतिवचनमेकत्वयुक्तेना
न्यपदार्थविशेषणेननोपपद्यतेवर्त्तिपदार्थानांबहुत्वसंख्यायुक्तानांदर्शनात्।यदिचकेषांसब्रह्मचारीकिंसब्रह्मचा
रीत्युक्तेततदापिकठानामितिप्रतिवचनंस्यान्नतुकठइतितथासमासांतोदात्तत्वंस्यादाद्युदात्तत्वंचेष्यतेयदिचकःसब्र
ह्मचारीकिंसब्रह्मचारीतिसुप्सुपेतिसमासस्तदाकठोहमितिप्रतिवचनमुपपद्यतेकिंतुस्वरदोषएवेतिचेत्॥बहुव्रीहिरे
वायंकेसब्रह्मचारिणोस्येतितुविग्रहस्तत्राग्रेकरवाणीत्यत्रकर्त्तृत्वेनिर्विकर्त्रयेनुज्ञातेयथाकर्मोप्यनुज्ञातंभवतितथेहापिक

स० उ०

॥७॥ न२

२वचनम्। अथार्द्धतृतीयास्त्वत्र यदि बहुव्रीहिस्तदार्द्धतृतीया येषामिति (न १) विग्रहे येषामिति ५

ऽहमिति प्रतिवचनेनैषामपि कर्तृत्वमभिहितं भवति तेषां कर्तृत्वे विना न तस्य कर्तृत्वोपपत्तिर्यतः समाने ब्रह्मणि व्र
तचारी सब्रह्मचारीति कथ्यते तस्मादेकवचनान्तमेव प्रतिवचनं न तु कठा इति बहुवचनान्तं भवति वन्निपदार्थानामुपसर्ज
नानां किं सब्रह्मचारीति समासेनाभिधातुमशक्यत्वान्नेपलक्षितान्यपदार्थस्यैव प्राधान्येनाभिधानात्। प्रश्ने तु के सब्रह्म
चारिणो ऽस्येति वाक्येन प्रश्नस्तदा कठा इति बहुवचनान्तमेव प्रतिवचनमन्यथानुपपन्नात् द्वयोरर्थस्य वाच्यपदार्थत्वे वक्त
व्यं। तद्वेनसे भवति अर्धस्य वर्तिपदार्थान्तर्भावाद् वृत्तिपदार्थव्यतिरिक्तस्यैव वाच्यपदार्थत्वात्। यदि वार्धतृतीयमनयो
रिति विग्रहस्तदा द्विवचनप्रसंगः किं च यदर्धं तत्तृतीयस्यैवेति द्वाभ्यां तस्य संबन्धो ऽवयवावयविभावलक्षणो नास्ति स्वस्वामि
भावलक्षणो वा संबन्धे बहुव्रीहिरनभिधानादेव न भवतीति समासानुपपत्तिः यद्यप्यर्धस्य द्वयोः स्वपः समुदायः समासार्थः
समुदाये ऽवयवास्तु कदाचिद् भेदेन विवक्ष्यन्ते यथा ब्राह्मणाः संघी भवन्तीति कदाचिदभेदेनापि यथा ब्राह्मणानां संघ इति त
थार्धतृतीया येषामित्यवयवेन विग्रहः समुदायः समासार्थ इति समाधीयते तदा समुदायस्यैकत्वे वनमिल्लादिवदेक
वचनादेकवचनप्रसंगः। अथ धवखदिरपलाशा इत्यादाविवोद्भूतावयवभेदस्य समुदायस्याभिधेयत्वाद् बहुवचनोपपत्ति
स्तर्हि असि द्वितीयो ऽनुससार पाण्डवमित्यत्रार्थो ऽपूरणयोर्द्वितीयः स च ध्यात्मकसमुदायावयव इति तदवयवस्य समु राम
दायस्य समासेनाभिधा द्विवचनप्रसंग इति उच्यते उद्भूतावयवभेदः समुदाय एव समासार्थः द्विवचनं त्वसि द्वितीय इत्य ७

त्रत्रवतिद्विती १

पशादस्य सहाय वाचिनो ग्रहणात् अर्धं तृतीयमनयोरिति विग्रहे यद्यपि न षष्ठ्यर्थानुपपत्तिः यस्मादेव दत्तस्य भ्राता तेस्य त्र
जन्यजनकभावस्यापि तत्स्वामेव सत्त्वेन भ्रात्रोः परस्पर[म]समसंबंधे पि समानोदरे शयितत्वमात्रेण काल्पनिकः संबंधः
षष्ठ्यर्थस्तथेहाप्यर्द्धस्य द्वाभ्यामेकवप्रदेशा[व]स्थानादिनिमित्तस्य संबंधस्य वक्तुमशक्यत्वात् अर्द्धतृतीया आनीयंतामि
त्युक्ते द्वयोरेव समासार्थत्वादर्धस्यानयनं न प्राप्नोतीत्ययमपि न दोषः संयोगसमवायलक्षणसंबंधे यदा वृकुक्षी हि स्त्रदामु
~~रूढ्वास समानय [illegible]~~
लंबकर्णमानयेत्यादौ यथोतस्यापि पदार्थस्य योगुणो वस्त्रादिस्तस्यापि कथितत्वेन संविज्ञानं भवति तथेहाप्युपलक्षणं यदर्धं
तत्सहितयोर्द्वयोरानयनसंभवात्तथाप्यत्र पदद्वयोः समासार्थत्वाद्द्विवचनप्रसंगो दोषः इति दिक्॥ अत्र मीमांसकाः
बहुव्रीहावन्यपदार्थे लक्षणा वचित्रगुमानयेत्यादौ वाक्यार्थस्य चित्रगोः स्वामिनः संबंधितयैव प्रतीतेः। यत्तु चित्रा गावो य
स्येति विग्रहवाक्यस्थ यस्येति पदं स्मृतं सदन्यपदार्थधियमुपनयति यथा दधि पश्येत्यत्र लुप्तास्मृता हि ति या कर्मत्वं
लक्षणां विनैव बोधयति विग्रहमनुज्ञानतरूत्र अन्यपदार्थधीः शक्तिभ्रमाद्भवतीति। तन्न। स्मृतयस्य पदात उपस्थितेन्य
पदार्थे कर्मत्वाभावेनानयनान्वयाभावप्रसंगात। न च चित्रा गावो यस्य तमानयेति तत्सदार्थस्याक्रियान्वयः स्यादि
ति वाच्यं। वाक्यार्थद्वयाननुभावात्तत्पदार्थस्य विग्रहेऽप्रयोगाभावेन स्मृतेरभावाच्च। यत्र दो नित्यसंबंधेन तत्पदार्थस्मर

णोलक्ष्याहारापत्तेः॥ ननुप्रकृतेध्याहारावश्यकत्वमात्रोक्तदोषइतिचेत्॥ तर्हिविभक्त्यर्थगतस्वार्थबोधक
त्वस्यत्रेगौणं तमेवकर्मत्वंविभक्तिरूपेण तुमलेनत्यंतदार्थानुगतमितिदोषोदुर्वारः किंचबहुव्रीहौनित्यसमासत्वेनक
थंविग्रहस्तदभावेचकथंयत्पदोपस्थितिःस्यात्तथाचयस्येतिपदमन्यार्थबोधकमितिनविचारसहं तत्रचित्रापदं
गोस्वामिलक्षकमितितुनयुक्तंगोपदार्थानन्वयात्रापिगोपदेलक्षणाकंगोस्वामिनिचित्रापदार्थान्वयानुपपत्तेस्तत्सा
दनन्यलभ्यस्येवशक्यार्थलाभः बहुव्रीहौवाक्यलक्षणैवान्यपदार्थधीरिति॥ तार्किकास्तुवाप्यसंबंधाभावेनवाक्येलक्ष
णानाश्रयणात्कोपदमेवचित्रगोस्वामिलक्षकं। चित्रगोपदयोस्तुप्रथममेवान्वयबोधस्तथाचस्वज्ञाप्यचित्रगोसंबंधेन
तत्स्वामिस्मारकंभवतिगोपदं चित्रापदंतुगवान्वितंस्वार्थंबोधयन्मुख्यार्थमेव। नचैवंवाक्यभेदः संबंधस्योपस्थितिहेतुचि
त्रगव्युपस्थित्यनुकूलत्वादितरपदमहिम्नैवविशेषस्यलक्षणीयत्वमतोनगोमात्रपदलक्षणायामितरपदवैयर्थ्य
मितिशंकनीयं चित्रापदंनस्वार्थसंबंधिनीगौरित्यागोपदंतुतत्रतात्पर्यग्राहकंचित्रगवीचस्वामिनंलक्षयतीति
लक्षितार्थस्यलक्षकतयालक्षितलक्षणयान्यपदार्थधीरितिनव्यक्रमाश्रयितुलक्षितलक्षणायाएकपदलक्षणाये
त्यात्रघटत्वाल्लक्षणायाःपदधर्मत्वाच्च॥ ननुचित्रापदस्यापिपरंपरयाचित्रगोस्वामिसंबंधाच्चित्रापदएवलक्ष
णास्त्वितिचेत्। साक्षात्संबंधेनगोपदस्यतदुपस्थापकत्वेसंभवतिपरंपराश्रयणेगौरवात्। नन्वेवंचित्रगुमानयेत्य

बभ्रूवादयो धातवो मैत्रादीनभोजनयत् लंबकर्णमानय प्रमुत्क्रव मक मानयेत्यादौ विशेषणस्य वर्त्तिपदार्थस्य वि
धेयान्वयो न स्यादिति उच्यते। चित्रगुमानयेत्यादौ अजहत्स्वार्थपक्षे तथात्वेप्यजहत्स्वार्थायां शकलस्य साधारणरूपेणोभयो
रपि काकेभ्यो दधिरक्ष्यतामित्यादौ दध्युपघातकत्वेन विधेयान्वयो दृष्टः प्रकृते च शक्तिपावाचित्वनिमित्तत्वविशिष्टादिरूपेण
विशेषणविशेष्योभयसाधारणेनोभयत्रापि कार्यान्वयस्तत्र विशेषणतया कार्यान्वयेपि स्वार्थान्वयादजहत्स्वार्थतेति तद्गु
णसंविज्ञानो बहुव्रीहिः संभवति तस्यान्यपदार्थस्य गुणो यो विशेषणं तस्य कार्यित्वेन संविज्ञानात्। चित्रगुमानयेत्यत्र तु
चित्रगोः संबंधित्वेनोपस्थितावपि स्वार्थस्योपलक्षणतया विधेयान्वयो नास्तीत्यतद्गुणसंविज्ञानोऽस्मिन्नत्रेति दिक्। अत्र
वैय्याकरणाः मुख्यासंभवे लक्षणाभ्युपगमनीया प्रकृते च चित्रगुसमुदायस्यान्यपदार्थे शक्तिकल्पनायां न किंचिदनुपप
न्नं। न च समुदायस्यान्यपदार्थे शक्तावयवयवार्थस्य तत्र तत्रानुपस्थितेपलक्षणे वशरणे शाकोपस्थितिमुपादाय च चित्रत्वगोत्वा
दिना तदानेकार्थत्वे प्रसज्येत अवयवार्थपरित्यागश्च स्यादिति वाच्यं। उद्भूतपदपदार्थसंबंधिनो योगरूढ्यान्यपदार्थस्य चित्रगोः
संबंधित्वेनोपस्थितेश्चित्रत्वादिनोपस्थित्यसंभवेनोक्तदोषाभावात्। मेडुपेनोजयेत्यादौ त्ववयवार्थनिरपेक्षैव रूढिर्विशे
षधीरित्यनवयवार्थे एव समुदाये रूढिः मंडपानकर्तृत्वरूपावयवशक्तिस्तु गृहविशेषसमुदायशक्त्या विरोधाद्बाध्य
ते प्रकृते तु अवयवार्थज्ञाने तत्संबंधिनो नज्ञानमित्यवयवशक्तेः समुदायशक्त्यानुकूल्यमेवेति चित्रग्वादिपदस्यान्यप

विभागात्समुदायादन्योन्यार्थान्वितावयवार्थः ४

दार्थे नियतं तात्पर्यं शक्त्यैव निर्वाह्यते। लक्षणाया तात्पर्यनिर्वाहे तु न वाक्यकल्पनोयावता शक्यलक्ष्यसंबंधो लक्षणेति
क्वचिच्छक्यमन्यत्र लाक्षणिकं भवति पदं न केवललाक्षणिकं। बहुव्रीहिस्तु चौर इव केवलमन्यपदार्थे तात्पर्यपर्याकु
लस्तत्कथमशक्यतात्पर्यनिर्वाहपर्याप्तो भवेत्। किंच। यजमानपंचमा ऋत्विजो लोहितोष्णीषा ऋत्विजः इत्यत्र यजमान
९ पंचमत्वलोहितत्वयोर्विधेयत्वेन तत्रैव तात्पर्यादन्यपदार्थे तात्पर्याभावात्तात्पर्यानुपपत्तिं विना लक्षणाया अप्रपि तु मश
क्तेः। शक्तेरेवव्यक्तमाश्रयः कथमन्यथा तत्रान्यपदार्थबुद्धिः स्यादिति। यद्यपि तत्र ऋत्विग्भिः सामानाधिकरण्यान्यथा
नुपपत्त्यान्यपदार्थान्वये तात्पर्यमस्तीत्यन्यपदार्थोपि तात्पर्येणवार्पित एव पापिविधेयतया न तात्पर्यं। ननु शक्तस्य क्वचिल्लक्षणे
पि तात्पर्यविच्छेद एव तात्पर्यमिति न सुवक्तव्यमिति चेत्। अस्त्वेवमन्यत्र बहुव्रीहौ त्वन्यपदार्थादन्यत्र प्रयोगाभावाच्छक्यार्थे ता
त्पर्यनियम एव। तत्र यद्यप्यवयवस्य विभागो रित्यादौ शाकेपि तात्पर्यं तथाप्यनेकमन्यपदार्थ इति वचनाद्बहुव्रीहिस्य
पदद्वयस्यान्यत्र प्रयोगाभावादन्यपदार्थे तात्पर्यनियमस्तत्र वाक्यस्य पदद्वयात्मकत्वात्तद्द्वये शक्तिरेव वाक्ये शक्ति
रिति समुदायनिष्ठत तात्पर्यनिर्वाहाय समुदायस्यान्यपदार्थे शक्तिः कल्प्यते। हंत तर्हि बहुव्रीहिस्य पदे निरूढलक्षणै छ राम
व कल्प्यतां तथैवान्यपदार्थे सुतात्पर्यनियमोपपत्तेर्न समुदायशक्तिः कल्पयितुमुचिता अन्यलभ्यस्यैव शक्यार्थ ९
त्वात्। तथा बहुव्रीहावन्यपदार्थे तात्पर्यनियमाच्छक्यान्तराभावादन्यपदार्थ एव शाकः केवललाक्षणिकस्याभावादिति वा

कपालत्वलक्षणाद्यादिनेमीमांसकेनप्रस्येववक्तुमुचितंननुपदस्यशक्यत्वात्तल्लक्षणावादिनेतार्किकेप्रतितत्रप्रामाणिके
नतदर्थमात्रपरतयालक्षणायाप्रयुज्यमानत्वेनिरूढलक्षणात्वंयथाघटंकरोतीत्यत्रघटःकर्मिकर्मतुकारकंकारकंतुक्रि
यानिमित्तंनिमित्तंतुकारणंतत्कारणंतुअनन्यथासिद्धत्वेसतिनियमेनप्रागभावावच्छिन्नसमयवृत्तित्वेसतएवत
याचाविद्यमानस्यघटस्यप्रागभावावच्छिन्नसमयवृत्तितायाअसंभवेनघटपदेघटविशिष्टकपालरूपावयवार्थमात्रपरत
याप्रयुज्यतइतितत्रनिरूढलक्षणातत्रविशिष्टविषयकप्रत्ययेसिद्धेकपालरूपविशेषांशमादायकर्मत्वविशेषणांशेचो
त्पत्तिर्नचैवंगंगायांघोषःप्रतिवसतीत्यत्रापिनिरूढलक्षणास्यादितिवाच्यंयथाघटंकरोतीत्यादौकरोत्यर्थकपदसमभिव्या
हारेवयवार्थमात्रपरत्वेवनतथाप्रवसत्यर्थकपदसमभिव्याहारेगंगादिपदेतीरार्थपरत्वेवंगंगायांमत्स्यःप्रतिवसतीत्यत्र
व्यभिचारात्।नापिघोषकर्तृकवासक्रियासमभिव्याहारेप्यवश्यंलक्षणास्ति।वनेघोषःप्रतिवसतीत्यादावनावात्करो
त्यर्थकपदसमभिव्याहारेतुघटपदादिशब्देसर्वत्रलक्षणैवेतिनिरूढलक्षणाशक्तितुल्येतिवदंति।तथाचवज्रब्रीहादावन्य
तरपदेसर्वत्रनिरूढलक्षणयेवान्यपदार्थप्रतीतिरस्त्वितिचेत्।अत्रोच्यतेएवंहिपंकजपदेवैयाकरणाभिमतावयवपद
श्रो२ शक्त्यानादाभिमतकेवलरूढ्यावानियतपद्मोपस्थितिसंभवेकिमर्थंयोगरूढिकल्पनंयावतावज्रब्रीहावितत्रापिनि
रूढलक्षणायेवशक्तितुल्यायानियमतःपद्मोपस्थितिर्भविष्यतिनचवाक्येशक्त्यभावान्नलक्षणा।चित्रगुरित्यत्रगोपदइव

स०उ०
॥१०॥

पंकोत्तरत्नपदएवतत्संभवात् । न चैवं शक्यलक्ष्यसाधारणोकरूपाभावादजहल्लक्षणा या वक्रमशक्यतावगुगपद्वृत्तिद्वयवि
रोधो दोषः शक्या जनिकर्तृत्वस्य लक्षणया पद्मत्वस्योपस्थितस्य विशेषणाविशेष्यभावेनान्वयात् गंगायां मत्स्यघोषा वि
त्यत्र तु शक्यलक्ष्ययोस्तीरनीरयोस्तयोरुपस्थितयोरन्योन्यमनन्वयात्तन्न दोष इति वाच्यं । एकपदोपस्थापितयोः शक्यलक्ष्ययोः
राजपुरुष इत्यादिसंबंधिकपदार्थोतिरिक्तस्थले परस्परान्वये युगपद्वृत्तिद्वयविरोध इत्यस्य परिभाषामात्रत्वेनादो
षत्वात् । अन्यलभ्ये शक्तभावनियमो बहुव्रीहाविवाचापि तुल्य एव । न च मे कुमुदे पंकजमिति प्रयोगः शक्यांगीकारे शक्यल
क्ष्ययोरान्वयाम्यभावसंबंधसंभवात् । कुमुदे पंकजनिकर्तृत्वं लक्षणया संभवति पद्मे लक्षणायां तु नयत्र लक्षणापत्तेः
कुमुदतुल्यतया नियता पद्मोपस्थितिर्न स्यादिति वाच्यं पद्मे निरूढलक्षणाया तत्र नियततोपपत्तेरत एव यदि पद्मकुमु
दयोस्तुल्यता तर्हि यथा गंगायां घोष इत्यत्र प्रवाहान्वयानुपपत्तिर्दृष्टैव केवतीरधीरूपजायते तथाग्रहीतपद्मयोगस्य द्र५
पद्मान्वयानुपपत्तिदृष्टैव केवकुमुदधीर्या संजायते सा न स्यात् वैपरीत्यमपि वस्यादिति निरस्तं । ननु पद्मे लाक्षणिकमेव
कुमुदे लाक्षणिकमित्यदृष्टं स्वरामीति चेत् । चित्रगुर्वनामित्यत्र लक्षितलक्षणाया अनंगीकाराल्लाक्षणिकस्येव चित्रगुप राम
दस्य यथा पुनः स्तत्पुरुषपूर्वपदत्वेन लक्षणा तथा प्रकृतेपि कुमुदे पुनर्जपदस्य लक्षणा स्यात् । यस्विमकृतान्वयानुपपत्त्य १०
भावात्तावर्षे शक्यापि निर्वा [illegible] ह्यत्र लक्षणेति तर्हि [illegible] बहुव्रीहावपि तुल्यमिति दिक् । ननु राजपुरुष इति तत्पुरुषे न वैयाकर

तोः शक्तिराश्रयितुं शक्या। अन [redacted] स्थलम्पस्येव शब्दार्थत्वादिति चेन्न तत्र पूर्वपदस्यैव षष्ठ्यर्थे निरूढलक्षणया राजसं
बंधिपुरुषबोधस्योपपत्तिः न चानुपपत्तिविरह इति वाच्यं। लक्षणाभावेन लघोः कर्मधारयस्याश्रये राजपुरुष इत्यत्र सा
मा [redacted] नाधिकरण्यधियोऽर्वारत्वाद्राजत्वविशिष्टपुरुषस्य कर्मत्वेऽस्मदादीनामनयनान्वयानुपपत्तेस्तात्पर्यानुपपत्ते
र्वीप्रकटत्वात्। तथा च श्रुतविभक्त्यर्थासंभवे षष्ठ्यर्थसंबंधे लक्षणा संबंधी तु न लक्ष्य इति मणिकृन्मते। संबंधिनो लक्ष्यत्वे
तु समानसमानाधिकसमासारंभकपदसमूहस्य विग्रहत्वाद्राजसंबंधी पुरुष इति विग्रहः स्यान्न तु राज्ञः पुरुष इ
ति तथाभ्युपगमे तु समानाधिकरणतापत्तौ षष्ठीसमासोच्छेदापत्तिः न च शक्त्यमानेदृशप्रतियोग्युपस्थापने कर्मधारय इति
वाच्यं। पदस्योपकारिकत्वे तदभावप्रसंगात्तस्मात्संबंध एव लक्षणा धर्मधर्मिभावेन च राजसंबंधपुरुषयोरन्वय इति
ज्ञेयं। ननु संसर्गविधया संबंधभाने संभवति किं लक्षणयेति चेत्। यद्विभक्त्यर्थी तत्र भावेन नामार्थयोरन्वयो विग्रहेणानु
भाव्यते समासेनापि तादृशार्थाभावेनानुभावनीय इत्येवं व्युत्पत्तेरिति सति विभक्तिलोपे विभक्त्यर्थलक्षणां विना न
स्यादाकांक्षेति तदर्थं समासे तदाश्रयणात्। न चैवं राजसंबंधितया भासमाने राज्ञो भाने च वक्रव्युत्पत्तिद्वयविरोध
इति वाच्यं संसंबंधिकपदार्थातिरिक्तस्थले पुनः पद्धतिद्वयविरोधस्याद्दोषत्वात्। ननु विभक्त्यर्थद्वारा नामार्थयोरन्वये ष
ष्ठ्यर्थस्थलक्षणया नामार्थत्वे कथमभेदेनाप्यन्वयः स्यादन्यस्य विभक्त्यर्थस्याभावादिति चेत् विभक्त्यर्थातिरिक्तनामार्थे

स॰ उ॰
॥११॥

तथा नियमात् । नन्वेवमपि नीलो घट इत्यत्र दोषव्यभिचारस्तत्र विशेषणविभक्तेः साधुत्वार्थत्वेन विभक्त्यर्थद्वारान्वयाभावात्
तथाभिधाने च नीलघट इति कर्मधारयेऽपि विग्रहसमानार्थकतानियमाद्भिन्नार्थद्वारान्वयो विभक्त्यर्थलक्षणायैव स्यात् तथा
चेत् तथा निषादस्थपतिं याजयेदित्यत्र लक्षणोपेते गुरुं तत्पुरुषमपहाय लक्षणाभावाल्लघोः कर्मधारयस्याश्रयणामि
ति । निषादाधिकरणसिद्धान्तो व्याकुप्येत तत्पुरुष इव कर्मधारयेऽप्युपकारीभूतलक्षणाप्राप्तेरिति चेत् न नामार्थयोर्भेदेनान्वय एवो
क्तव्युत्पत्तेः घटो नेत्यादौ घटाभावयोः संबंधोऽन्वयप्रकारतयाभासात् इति न तदर्थं षष्ठ्यर्थलक्षणा तत्रापि विभक्त्यर्थसंख्यान्व
यानुभावकत्वे तद्द्वारैवोक्तव्युत्पत्तिर्घटः पद इत्यत्र तु संबंधलक्षणैवेति ज्ञेयं । नन्वेवम[illegible]पि सर्वनाम्नि लक्षणाविरहात् तद्धन
मित्यादौ का गतिरिति चेत् । तत्रापि शक्यसंबंधसत्त्वेन तस्य धनमिति पूर्वपदे लक्षणांगीकारादेतदतिरिक्तस्थले सर्वनाम्नि
सा ५ न लक्षणेति नियमः । ननु राज्ञः पुरुष इति विग्रहे या षष्ठी समासावस्थायां लुप्तास्मृता संबंधस्मारिकेति किं लक्षणयेति
चेत् समासात् पूर्वं विग्रहश्रवणे नियमाभावात् विग्रहाभिधाने तु शाब्दिकानां समाससार्थकपनपरं । विभाषाधिकारस्तु समा
सविग्रहयोः साधुत्वपर्यायत्वं च बोधयितुं न पुनर्विकल्पेन समाससाधुताभावं बोधयितुमतो नास्ति विग्रहश्रवणे नियमः राम ११
यत्र तु न विभाषाधिकारस्तत्र विग्रहस्यासाधुत्वे समास एव । चित्रगुरित्यादिप्रयोगे साधुर्विग्रहो नित्यसमास इत्यस्य तु
विग्रहोऽप्यत्रासाधुः स नित्यसमास इत्यर्थस्तथा च राजपुरुषमानय राज्ञः पुरुषमानयेति च पर्यायसाधुत्वादुभयं प्र

योक्तव्यं तथा चित्रगावो यस्य तथा मध्य चित्रगुमानयेत्यर्थे न प्रयोगार्हं वालानुप्रक्रियावाक्येन व्युत्पाद्येत इति चित्रा गावो य-
स्येत्यर्थकथनमात्रेन प्रयोगार्हं अथ व्याकरणं वाचकस्यानुशासनं न लक्षणेकस्वरा किंत्वव्युत्पत्त्या परंपरयैव लब्धसंस्कार
कस्य तस्य व्युत्पत्त्यंतरापेक्षाया अभावादिति चेत। साधुपदानामनुशासने व्याकरणे न तु गाव्यादेः साधुतावबोधक इव ला-
लाणिकेपि। किंच। लक्षणे पाप्येकवचनस्य द्वित्वादौ प्रसक्तौ प्रयोगो न साधुरिति द्व्येकयोर्द्विवचनैकवचने इति सूत्रारंभेण
ज्ञाप्यते अन्यथा तास्येकवचनाद्विवचनबहुवचनान्येकशब्दत्वन्त्वर्थैकवचनादिसंज्ञाविज्ञानो द्वित्वादावशक्तत्वादेवैक-
वचनाप्रयोगे तथ्यर्थे न कल्पनीयं स्यादेवं च विभक्तौ न लक्षणेत्यनेन ज्ञाप्यते न तु सामान्यतः समासादावपि लक्षणा-
भावो ज्ञाप्यते तुल्यजातीयस्य ज्ञापकत्वाद्यद्यपि द्वित्वादावेकवचनादेर्न लक्षणया प्रयोग इत्येव ज्ञाप्यते तथापि तृतीयादेः
कर्मत्वादौ लक्षणया प्रयोगो मा भूदिति सामान्यतो ज्ञापकस्याभिलषनविभक्तौ लक्षणेत्युच्यते। ननु यदि विभक्तौ न लक्षणा तर्हि
कर्तौ यावयविन्याप इति प्रयोगो बहुत्वएकत्वलक्षणां विना कथं स्यात। न चावयवगतबहुत्वान्वय इति युक्तं पापः परमाणो-
वगतेः। न च तरु तरूपादयो बहव इति तदादायतदुपपत्तिरिति वाच्यो। विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेर्प्रकृ-
त्यर्थरूपादिबहुत्वाभिधाने विभक्तेः सामर्थ्याभावात। न च प्रकृत्यर्थलक्षणयैवोपपत्तिरिति वाच्यं। उभयसाधारणरूपाभा-
वादनह त्वार्थीयास्तस्यावकुमशक्यत्वत। न वापः पदपेस्तत्र मुख्यैव स्वाकयित्वाभिधाने लक्षणया चैकत्वबोधनेयुग

पत्तृत्रिद्वयविरोधइतिवाच्यं।एकत्वादिविशिष्टकर्मत्वेबहुवचनस्यमाद्यणिकत्वादितिमैवं।बहुष्वेबहुवचनंनैकस्मिन्द्वयो
रितिनियमनिरूपकेबहुषुबहुवचनमित्यनुशासनेनसत्यापइत्यादावेकत्वलक्षणपाच्राश्रयितुमशक्यत्वादन्यथा
तद्वैयर्थ्यप्रसंगादन्वर्थसंज्ञयैवतत्रप्राप्यभावस्यसिद्धस्यात्।अत्रेदंबोध्यं।पंचकप्रतिपदिकार्थदर्शनेद्वित्वबहुत्वयो
12 रपिप्रकृत्यर्थत्वादितिप्रसंगेएकस्मिन्नेवैकवचनमितिद्व्येकयोरित्यस्यआख्येनियामकत्वमंगीकृतं।तत्रविभक्तावशक्यायां
लक्षणायाअसंभवएवेतिनविभक्तौलक्षणेत्यनेनेनप्रयोजनमन्वर्थत्वेचसंज्ञायानसंभवति।इतीतुत्रिकप्रातिपदिकार्थदर्शि
नाश्रयेणद्व्येकयोरित्यस्यविधायकत्वमंगीकृतं।एकवचनादिसंज्ञातुसर्वनामस्थानसंज्ञावत्रान्वर्था।तत्रव्याकरणस्यवा
चकानुशासनत्वात्रविभक्तौलक्षणेननप्रयोजनं।मारिकृतानुलाक्षणिकानुशासनेत्वेङ्टयितुंत्रिकप्रातिपदिकार्थदर्शि
नेद्व्येकयोरित्येतत्रविभक्तौलक्षणेत्यस्यज्ञापकंस्वादिसूत्रंत्वेकत्वादिविधायकमित्यभिहितं।तत्रस्वादिमात्रविधायक
स्यकथमेकत्वादिविधायकत्वमित्याशंक्यतान्येकवचनद्विवचनेतिसूत्रेणान्वर्थसंज्ञाविधायकेनसहकृतेस्वादिसूत्रे राम
विधायकमितिमत्वामिश्राप्रभृतिभिर्व्याख्यातं।तथावान्वर्थसंज्ञयैवैकत्वविधिरित्यादिसूत्रेणगतं।तत्रयदिद्व्येकयोरिति
विधिरन्वर्थसंज्ञयावनियमइत्युच्येततदायस्यामन्वर्थसंज्ञायातदनुवादाधीनोविधिःस्यात्तिचविधावन्वर्थसंज्ञेतिपरस्प १२
राश्रयःस्यात्।किंचान्वर्थसंज्ञयानियमोद्व्येकयोरितिविधिरितिसर्वथाशंकितुमयुक्तंनियमेसत्यन्वर्थसंज्ञायाअपि

द्वन्वर्थसंज्ञायां च नियमासिद्धेस्तथा हि। एकत्ववाचकमेकवचनं संज्ञामिति संज्ञादिशेषणे नियमनिरूपकपदाभावो नि
यमेव संज्ञाविशेषणाभावः किंच। नियमोपि भवन्नयमनियमो वा संज्ञानियमो वा नाद्यः संज्ञाया असिद्धेः संज्ञाशब्दे
नप्रत्ययनियमासंभवात्। न द्वितीयः एकत्ववाचकमेवैकवचनं संज्ञमिति नियमे न विभक्ताविति ज्ञाप्यार्थस्य लघुमशक्यत्वा
त्। संज्ञायाश्च पूर्वमेवायं विधिरिति पाक्षिकप्राप्त्यभावेन नियमासंभवाद्द्व्येकवचनादिसंज्ञया विधिर्द्व्येकयोरिति नियामक
त्वाज्ज्ञापकमित्याश्रितं। एवं च कप्रतिपदिकार्थपक्षेप्यन्वर्थसंज्ञाया नियमाद्द्व्येकयोरिति न वक्तव्यमिति शकनीयमिति। अ
त्रान्वयर्थसंज्ञाया विधायकत्ववाचो युक्तिर्नयुक्तिमती। तथा हि। सकलं तु तस्य संज्ञाशब्दस्यार्थपरत्वसंज्ञिपरत्वयोरसंभवा
त्। सर्वादीनि सर्वनामानि प्रत्ययः परश्चेत्यादिवाक्याभ्यामर्थद्वयप्रत्यायनाय शब्दं तंत्रादिकं मंगीकरणीयं स्याद्द्विगीकृते
ष्येकवचनमेकवचनमिति शब्दद्वयप्रकृतेन निर्वाहः एकत्वसंख्यायाः स्वादिवाच्यत्वस्य केनचिद्विधानादेकत्ववाच
केषु वचनं संज्ञमिति विदितसंज्ञाविशेषणस्यानुवादासंभवात्। न च तिङ्क्ष्वप्येकत्वादिवाचकान्येकवचनादिसंज्ञानि चे
ति कथमपि विधिद्वयं पुरुषमाश्रयितुं। संज्ञाप्रकरणे विरुद्धस्यापविधः संज्ञासूत्रे तेंगितया तत्र लक्षणाप्यवितुमशक्यत्वाद्द्वेवमन्वर्थ
संज्ञात्वव्याघातरत्यन्वर्थसंज्ञाया संख्यावाच्यत्वकामद्दति स्ववचनविरोधश्च। अथैकत्वादिवाचकमेकवचनादिसंज्ञामि
ति वचनमेकान्यथानुपपद्यमानमेकत्वादिवाचकतां स्वादेर्बोधयिष्यतीत्युच्यते। हंतैवमनयैव दिशा प्राप्तं प्रतिपत्तिगौरव

स०उ०

॥१३॥

13

एवमपरीक्षितालक्ष्यकृता द्व्येकयोरिति विधायकमारब्धं किंत्वेवमप्यन्वर्थसंज्ञायाबाध्यत्वसंख्याया इति गतं। ज्ञापकादेवागत
त्वात्। अपि चैवमस्योन्यायः एकवचनशब्दस्यार्थ एव परत्वेकल्पिते तदन्यथानुपपत्त्या संख्याबाध्यत्वसिद्धिर्वाच्यत्वसिद्धेश्च
र्थपरत्वकल्पनं तस्यैति। किं च बहुषु बहुवचने द्व्येकयोरिति सूत्रद्वयमर्थविध्यर्थं। तत्र किमेकेनाविभक्तौ लक्षणेति सामान्यतो ज्ञा
पकं। द्वयमपि वा। नद्यः द्व्येकयोरित्यनेनेन न विभक्तौ लक्षणेति ज्ञापिते बहुवचनस्य लक्षणया द्व्येकयोरप्रसंगे बहुषु बहुवचनमि
त्यस्य वैयर्थ्यापातात्। बहुषु बहुवचनमित्यस्य ज्ञापकत्वे तु द्व्येकयोरित्यस्य वैयर्थ्याप्रसंगात्। किं च न विभक्तौ लक्षणे
ति ज्ञापनार्थमेव यद्द्व्येकयोरिति सूत्रं तदा एकस्मिन्नेकवचनमित्येव सूत्रं कर्तव्यं तेनैव सामान्यतो लक्षणाभावावावेदिते ष
षवैयर्थ्यमनिवार्यं। तथा च तथाकरणाभावादेव विधायकतामावेदयितुमीश्वरः। अपविशेषतो ज्ञापकेन सामान्यतस्तथा
बहुवचनं द्व्येकयोर्लक्षणाभावाभूदिति तदपि कल्प्यमेवेति चेत्। द्व्येकयोरेव द्विवचनैकवचने द्विवचनैकवचने एव द्व्येकयो
रित्युभयतो नियमाश्रयणादेवोक्तदोषप्रमोषात्। तथा बहुषु बहुवचनमित्येतदपि क्रियमाणं प्रमाणं विधायकतामेव
किं च। तान्येकवचनेति ङ विषयं कथं बहुत्वविषयं स्यात्। अथ सुप इति सूत्रे एकवचनादिसंज्ञानुवृत्तिमभिप्रायेणोदमुक्तं। तथापि राम
तान्येकवचने त्यन्वर्थसंज्ञया तिङि विवेली मेसति द्व्येकयोरित्यस्य तिङ्शेपि लक्षणाभावज्ञापकता यो प्राप्ताया सुपविभक्तौ १३
नलक्षणेति विशेषः कथं लब्धशकाः एकवचनादिसंज्ञानां सुपत्रसत्वे नोभयत्रापि द्व्येकयोरित्यस्य प्रवृत्तेरित्यलमतिपल्लवेन। अप

ति३

त्रुस्वादिसत्त्वेणैकत्वं विधीयते तथापि प्रथमोपस्थितत्वादेकत्वे एव तरूवतीसादि तर्कसहिते नेत्यर्थइति चिंतामणिकणिका
पुरुषोत्तमेन व्याख्यापि तदपि न युक्तं। यतः स्वादीनामविशेषोदकत्वादौ सति विधाने किं कुत्र स्यादिति विचारणे प्रथमोपस्थितत्वा
देकत्वएकवचनमिति वक्तुं युक्तं स्वादिसंख्ययोः परस्परवारित्रमभिन्नं तेनैव। पदः पिके स्थितं युक्तं। युपोधुयो भवंति तिङो तिङ इति स्वत्यया
नुशासनान्न विभक्तौलक्षणेति लभ्यमिति तदपि व्यत्ययेच्छंदोधिकारात् अयुक्तमिति कृतमधिकेन। द्वयथवबहुत्वादापइति प्रयोगे जल
परमाणौ तु बहुत्वारोपादिति केचित्। अन्ये तु बहुवचनांतएवापशब्दः साधुरिति साधुत्वापोपात्तमपि बहुवचनमयोग्यतयानान्वे
तिकमित्याघेयान्वेति तत्र त्रिकप्रातिपदिकार्थे दर्शनेबहुत्वबहुवचनमित्यादिना भिन्नवाक्यतयास्वादिस्वादिविधिवाक्ये न विहिताः
स्वादयो निःसंख्येभ्योऽव्ययेभ्यो यथाप्सा धुत्वायोत्पद्यंते तथा प्रकृते पि साधुत्वाय बहुवचनं भवति। पंचकपक्षेपि स्वादिविधिवाक्ये
न विहितस्य बहुवचनस्य बहुष्वेव बहुवचनमिति प्रत्ययनियमेन न व्यावृत्तिः तुल्यजातीयस्यनियमेव न व्यावृत्तेरेकत्वादिसंख्याया एव
तेन व्यावर्तनात्। बहुषु बहुवचनमेवेत्यर्थे नियमेनु प्रत्ययमानामनियतत्वादव्ययेभ्यो निःसंख्येभ्यो यथास्वादयस्तथाप्रकृतेपिब
हुवचनमनिवारितमितिदिक्। ननु राज्ञः पुरुषमानयेत्यत्र राजपदात्संबंधुपस्थितावपि सामानाधिकरण्येपि विभक्तेः स्यादतोऽन्वयधीः कथं
स्यात् राजसंबंधिनश्च पुरुषस्य प्रकृत्यर्थताभावे कथं तत्र तं स्वार्थैकभिविभक्तिबोधकये हि भक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्ते
स्तथा राजसंबंधि पुरुषेशक्तिरेव समासस्य तथा च बहुव्रीह्यादावपि शक्तिरेवा न चैवं वाचके समासे व्यर्थवद्वक्तुरित्येव प्रातिपदिक

स०उ०
॥१४॥

संज्ञायां सिद्धायां कृतद्धितांतयोः प्रसक्यातत्वादप्राप्तेः कृतद्धितांतग्रहणसामर्थ्यं क्वापि समासग्रहणां कृतद्धितसमासाश्चेत्यत्र सूत्रे
व्यर्थं स्यादिति न वाचकत्वे तस्य समासग्रहणसामर्थ्यादिति वाच्यं। समासग्रहणसमार्थ्यं वदादिसूत्रप्रपंचत्वेनाप्युपपत्तेः नन्व
पिवत्समुदायस्य यदि प्रातिपदिकसंज्ञा तर्हि समासस्यैवेत्येवं नियमार्थं समासग्रहणं तेन देवदत्तं गामभ्याजेत्यादिवाक्ये न प्राति
पदिकसंज्ञेति समासस्यैवेत्येवं नियमार्थं समासग्रहणं तेन देवदत्तं गामभ्याजेत्यादिवाक्येन प्रातिपदिकसंज्ञेति भाष्यकारादिभि
रभिहितं तत्कथं चिंतनयायोगप्रपंचार्थत्वमुक्तमिति चेत् उच्यते। अविदितपतंजलिवचोविलास एव तथाविधमशंकमा
नोयन मानो चित इत्युत्तराभासेनैव निरुत्तरतामायातिवो त्किमेतं प्रतिसद्धु उत्तरो वन्यासेनेत्याशयेन वैयाकरणप्रपं
चार्थत्वमेव समासग्रहणस्य पाणिनवानिति पाअत्रोच्यते। नीलं घटमानयेत्यादौ विशेषणविशेष्यपदाभ्यामेव यथाकों द्वा
दिसाचिभ्याद्न्वयोऽनुमाप्यते विशेषणे विभक्ति सुसाधुत्वाप्यीतया राजसंबंधस्य पस्यापकराजपदसन्निहितपुरुषपदस्य देवरा
जमेवं विपुरुषस्योपास्थितिः समासप्रातिपदिकावयवभूतायाः विभक्तेः सुपो धात्विति लोपे विभविष्यति किंविभक्त्या तादृश
पुरुषपदेव समासोत्यत्र विभक्त्यर्थान्वयः प्रकृत्यर्थान्वयव्युत्पत्ति सुसमासातिरिक्तविषया। तत्रतु समस्यमानपदार्थग
तस्वार्थबोधकत्वमेव विभक्तेः कल्प्यं। नन्वेवं राजसंबंधेपि पुरुषइवक मेत्वान्वयः स्यादिति चेत् समासे तात्पर्यविषयीभू
तसमस्यमानपदार्थस्वार्थबोधकत्वात्। नन्वेवं व्युत्पत्त्यंतरकल्पनागौरवमिति चेत्। अश्रुतहिसन्निहितपदार्थगतस्वा

राम
१४

र्थबोधकत्वं सर्वत्र विभक्तेः। ननु नीलो घट इति कर्मधारये न लक्षणा नापि शक्तिरिति तार्किकाणामभ्युपगमात्तथा
च पदार्थनीलघटयोः सामानाधिकरण्यमन्वयः प्रकारतया तत्र भासते तथा राजपुरुष इत्यादावपि तथैव षष्ठ्यर्थोपस्थि
तिरस्तु किं लक्षणयेति चेत्। उच्यते। नान्वयप्रतियोगितया सामानाधिकरण्यं तत्र भासते नामार्थयोरभेदरूपस्या
नुभूयमानस्य तस्यान्वयत्वेनान्वयप्रतियोगित्वासंभवात्। अन्वयस्याभेदस्य प्रतियोगिनो रूपस्थितिस्तु नामपदशक्त्यै
वेति तदर्थं न लक्षणा। राजपुरुष इत्यत्र तु राजसंबंधपुरुषयोरन्वयोऽनुभूयते तत्रान्वयप्रतियोगिनो राजसंबंधस्योपस्थि
तिः षष्ठ्यर्थलक्षणान्तरेणानघटतरतित तत्र तदभ्युपगमः। एवं चेत्तन्निषादस्थपतिं याजयेदित्यत्र तत्पुरुषे षष्ठ्यर्थलक्षणा
पत्तेर्बहुव्रीहावन्यपदार्थलक्षणापत्तेः सर्वपदानां स्वार्थपरतया मुख्यत्वान्निषादश्चासौ स्थपतिश्चेति कर्मधारय एवाश्र
यणीयः। ननु निषादस्य निर्विद्यत्वात्कथं यागेऽधिकार इति चेत्। लिङ्गाद्व्याप्त्यैवैतेव निर्वाहकतया यागानुकूलविद्याप्रयुक्तिरोऽस्य
रनिषादस्यापि प्रवृत्तेरस्मात्सौत्रात्। ननु अध्ययनविद्याप्रयुक्तिकल्पनातः षष्ठ्यर्थलक्षणाया लघुत्वादत्राध्यविद्यत्रैवर्णिके एव निषा
दानामीश्वरोऽधिकारी बोध्यते तत्र यद्यपि निषादानामीश्वरो निषादोऽपि संभवति तथापि लक्षणाविद्याप्रयुक्तिकल्पनाबलादविद्यत्रै
वर्णिक एव लभ्य इति चेत्। उच्यते। यथा वर्षासु रथकारोऽग्नीनादधीतेति रथकारादिस्थले मुख्यार्थानुरोधाल्लक्षणविद्याप्रयुक्तिः रथ
कारोऽसौ ग्रामादिकीतथा प्रकृतेऽप्यभेदान्वयबोधस्य प्राथमिकत्वान्निषादस्य मुख्यत्वसंभवात्तदन्वयबोधानुरोधेन कल्पितात्

स्वविधाप्रयुक्तेस्तत्फलत्वेन फलमुखगौरवस्य प्रमाणवतोन्याय्यत्वादोषत्वात्तायत्तथापि वेदं शृण्वतः शूद्रस्य त्रपु
जतुभ्यां श्रोत्रपूरणमुच्चारणे जिह्वाच्छेदस्य इत्यस्य का गतिरिति चेत्। उच्यते। तथा न हिंस्यात्सर्वा भूतानि निषेधोऽगम्यालम्भे
तेत्यत्र सामान्यतो निषेधस्य तद्विशेषविधानबलात्क्रत्वेतरवर्तिहिंसाप्रतिरिक्तहिंसापरत्वमेवं प्रकृते विशेषविधिबलादेव
15 पाठ निषेधस्येश्वरनिषादेतरशूद्रपरत्वमेवं चोपक्रममित्याद्यध्येयम्। मा वेद्दि पिप्पलीत्यादौ पूर्वपदार्थप्रधाने तत्पुरुषे चकु
भस्य समीपे पिप्पल्या अर्धं च तात्पर्यमुत्तरपदे षष्ठ्यर्थलक्षणा न तु शक्तिः समासे इति अत्रेदं विचार्यं। लक्षणापि राजपु
रुषादौ पूर्वपदे अर्धपिप्पल्यादावुत्तरपदे कल्पनीया प्रकृतसमर्पितस्वार्थबोधकत्वमुत्पत्तिरणेि समासातिरिक्तवि
षयेति कल्पनीयमिति कथं न गौरवं। प्रकृते संनिहितपदार्थगतस्वार्थबोधकत्वकल्पने तत्पक्षे मर्द्धपिप्पलीत्यादौ त
दभावान्नयुक्तं तत्रानुशासिकसंनिधिविरहणायामपि गौरवमेव। शक्तौ तु समासत्वेन शक्तिकल्पनायुत्पत्तेः संकोचाच्च
लाघवमिति सैव कल्पयितुमुचिता। कथमपस्यारपकारादिशब्देऽपि शक्तिरस्तु पगं तु शक्ते तनिषादस्थपतिमित्यत्र
तर्हि कथं कर्मधारयत्वं स्यादिति चेत्। स्थपतिपदार्थस्येश्वरस्य प्रतियोग्यपेक्षत्वेन तदपेक्षापूरणाय षष्ठीसमासे नि राम
षादपदमेव समर्थमिति निषादानां स्थपतिरिति तत्पुरुषस्यैवाश्रयणौचित्यात्। तत्र च नरपतिपदान्नरपतिर्निरण्यपृथा १५
प्रतीयते तथा निषादस्थपतिपदान्निषादरूपेश्वरप्रतीतिरस्त्विति दिक्। ननु कृष्णतिला इत्यत्र कथं नित्यसमासः कर्मधारयः

स्यात्समुदायेन कृष्णतिलजातिबोधनात् कर्णातिलयोरभेदावबोधनान्न इति चेत् । अविग्रहत्वेन नित्यसमासत्वा
त् । केचित्तु । कृष्णतिलादौ योगारूढिरित्याहुः । अत्रेदं बोध्यम् । यद्यपि कृष्णतिलशब्दौ द्वावपि गुणजातिनिमित्ताश्रयेण द्र
व्यवृत्ती तयोरपि च द्रव्याधीनैकक्रियायोगस्तुल्य इति विशेषणविशेष्ययोरनियमात् उपसर्जनत्वमप्यनियतं भवति प्राधा
न्यमपि जातिनिमित्तद्रव्यशब्दस्येव गुणनिमित्तद्रव्यशब्दस्यापि समानमायाति । तथापि गुणगुणिनोरभेदोपचा
राद्द्रव्याभिधायी । कृष्णशब्दो न साक्षात्क्रियायामभिसंबध्यते किन्तु द्रव्यद्वारा नापि गुणस्य द्रव्येणानित्ययोगत्वप्रज्ञनाप
पदर्शनाज्जातिस्तु स्वाश्रयत्या विनाश्रयद्रव्येणाव्यभिचरितसंबद्धेति तद्धितस्य द्रव्यस्यात्मवात्मकल्पेति साक्षादेव जा
तिमद्द्रव्यं द्रव्यक्रियया समन्वयमेति तथा च तिलशब्दो विशेष्यं प्रधानं च न तु गुणशब्दः उत्पलस्यरूपं परस्परतीत्वाद्द्वावपि व
स्तुतो गुणावच्छिन्नद्रव्यद्वारैव क्रियान्वयः संयुक्तसमवाया त । केचित्तु । यद्यपि वाक्ये गुणावच्छिन्नद्रव्यवचनस्तथापि वृत्तौ
कृष्णशब्दो गुणमात्रमेव द्रव्याभिधायि तिलविशेषणम् अतमाचष्टे यथा अजाद्यादेवदत्त इत्यत्राजाशब्दो रूपानियतजा
तीयद्रव्याभिधायिनोः परस्परमसंबंधाद्विद्यमानत्वमानोऽप्यस्येत्येवमजन्मलक्षणधर्ममात्रवचनत्वमजशब्दस्य वृत्तौ सं
बंधोपपन्नये सिध्यति तथा कृष्णशब्दस्याप्येकार्थीभाववृत्तौ वृत्तौ गुणमात्रवचनत्वमिति दिक् । अत्रोपसर्जनं प्रधानोपकारि
तया परितन्तं स्वार्थमाचष्टे इति राज्ञः पुरुष इति षष्ठीमुपादत्ते प्रधानं तु स्वात्मन्यवस्थितम् परोपकारीति प्रथमपायुस्य

स०उ०
॥१६॥

ज्यतोवीरःपुरुषइतिसमानाधिकरणेतुद्वावपिद्रव्यशब्दौरूपांतरेणापरिणतेस्वार्थमावच्छिन्नइतिप्रथमैवेतिएतद्
जतम्यरूपमित्यपरजनप्रयोगेसामानाधिकरण्यमेतत्पदरजतपदयोरेकार्थबोधनयोग्यत्वस्यसामानाधिकरण्यशब्दा
र्थत्वाद्योग्यताक्रमेणतत्रतत्संभवात्स्वसेयमितिदिक्॥ इहवपुरपरंवापत्यपरस्योपायुक्तंकथयतस्त्वशिष्टंनष्टमन्यतम
स्तं॥ कथमपिपरदंताग्रातऊंगीकृतोहिःकलयतिरविलोपगंलोपमन्यःप्रयाति॥४॥ इहसंसारेवपुःशरीरमपरंध
नवसनादिकंचयत्परस्योपयुक्तंपरार्थंज्ञातंतदवशिष्टमात्मार्थमुवरितंपद्यपरोपकारायनज्ञातंतत्समस्तमपिनष्ट
म्यागतमितिकथयेत्पन्वयः॥ धनजनदेहगेहादिसकलमितिविनश्वरमिवियाव्यतेनपरोपकारमेवनिरंतरंसाधयेस
रलोकादिहितायेतिभावः॥ उक्तंचमहाभारते विद्यातपोधनेशौर्येकुलीनत्वमरोगता॥ राज्यंस्वर्गश्चमोक्षश्चसर्वंधर्मादु
वाप्यते॥ यस्तुधर्मंपरित्यज्यलोभादर्थमभीप्सते॥ सहेमराशिमुत्सृज्यपांशुराशिंजिघृक्षति॥ किंधनेनविपन्नस्यपर
स्यैःपरिभुज्यते॥ परोधर्मःकृतोयस्तुमृतमप्यनुगच्छति॥ देवतामुनयोनागागंधर्वागुह्यकास्तथा॥ धार्मिकंपूजयंतीहन
धनाढ्यंनकामुकं॥ अर्थहीनोपिधर्मात्मास्वर्गंगच्छतिमानवः॥ अर्थवानधर्महीनस्तुनरकंप्रतिपद्यते॥ त्यजंतःसंचयान्
सर्वान्यांतिनाशमुपद्रवाः॥ नहिसंचयवान्कश्चिद्दृश्यतेननिरुपद्रवइति॥ श्रीमद्भागवतेपिवृत्रवधार्थमस्थीनियाच
मानोनदेवान्प्रतिप्रतिश्रुतदानेनदध्यङ्ङार्षिणानिहितं॥ योध्रुवैरात्मनानाथनधर्मंनयशःपुमान्॥ ईहेतभूतद

राम
१६

यपापसशोच्चः स्याद्वैरपि। अहो हेत्यमहो कष्टं पारकेः। द्रूण्णमंगुरोः यत्रोप कुर्यादित्यर्थे मत्यैः स्वज्ञातिविग्रहे रिति। प
रकेः स्वपरगलादिभह्नेः। अत्रार्थे रात्मो पयोगरहिते: स्वं वित्ते ज्ञातयः पुत्रादयः विग्रहो देहः। ते नोपकुर्यान्न देव्यमित्यर्थः
यतयस्मात् अहंतास्परोलोपम ध्ययमेकवचनं हि प्रत्ययस्मात् डाहेशेन यः कवलीकृतः। सस्यानिवद्भावाद्यतोहेरित्यनेन
लोपभवतादित्यादौन प्रयातिनात उ देशस्य विकल्पनान्न दभावपदे योहिः सन्तु लोपभवेत्यादौ प्रयातीत्यर्थः यद्यप्यतो हे
रित्यत्र उ प्सत नव्यो हो ह्रिरित्यतो हि ग्राहणमनुवर्त्तते तस्य च हिरेवयो हिर्न तु स्याकद्भावे न योहिः स्तस्यैवत्ये योनान्यस्येत्य
र्थः। उवतादित्यादौ न तल्लोपः। रूपापि कविना परोपपुक्तत्वमेवात्र हेतुरुक्ते द्वितइति दिक्। अत्र वक्तव्यमु कं नम्रमो
सार्पेतात उ॰ श्लोकव्याख्यायां श्लोकादिवत्स्वयमनेकविभक्तिलक्ष्म्यायुक्ताः स्फुरंति वहवोपि नतेपरं तु हरांतिकादि
६ वदिहोचितया नयायेगोभोग तावत परानपि शोभयंति। अनेकागजवाजिवसनविभूषणादिकायाविभक्तिर्विभाग
स्तद्वत्यालक्ष्म्यापे स्वयं शोभितास्ते वहवोपि संति किंवत् श्लोकादिवत्। यथा श्लोकादयः करोत न श्लोकाल्पक्लृप्तकतिप
यस्यासत्ववचनस्येति पाणिनिक पंचमी विधाना भ्दितीयायाश्चकरणे सिद्धत्वात् दनेकविभक्तिशोभया युक्ता बहवोपिस
ति। परं तु ते पुरुषा नव हव्वः किंतु विरला एव। ते केइत्यत आह। ये इह संसारे उचितया तथा नेकप्रकारिकपाल लक्ष्मा
शोभां स्वयं प्राप्ताः परानपि महोदारतया रूपालं तथा च शोभयंति। किंवत् हरांतिकादिवत्। यथा हरांतिकादिशब्दे

स॰उ॰
॥१७॥
17

रांतिकार्थेभ्यो द्वितीया च सप्तम्यधिकरणे चेति द्वितीयापंचमीसप्तमीनां सिद्धत्वादनेकविभक्तिलक्ष्ययुक्ताः संतोदू
रांतिकार्थैः षष्ठ्यन्यतरस्यामिति तद्योगे षष्ठी पंचम्यो विधानात् स्वरानपितादृशात्रकृतीति स्वार्थी । करणे च स्तोकाल्प
कृच्छ्रकतिपयस्यासत्त्ववचनस्य स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारके तृतीया भवति पंचम्य
त्र पक्षे विधीयते तृतीयानुकरणाइत्येव सिद्धा । अल्पादिव स्तोकादयोऽद्रव्यमात्रगुणं वर्तते अत्र पदाद्रव्यं गुणमुपसर्जनी
कृत्योच्यते तदासत्त्ववचनत्वात् स्तोकेन विशेषेणाहृतइति तृतीयेवापद्यानुगुणमभिधेयं । तदासत्त्ववचनेनेति स्तोका
न्मुक्तः स्तोकेन मुक्तइत्यपि भवति । स्तोकं चलतीत्यादौ क्रियाविशेषणे कर्मणि मा भूदिति करणग्रहणं । चलति चलनं
करोतीत्याख्यातेन क्रियायाः साध्यमानावस्थाया अभिधानस्तोकं चलनं करोतीत्येवं तद्विशेषणस्यापि कर्मत्वं भव
ति संसदर्शिनप्रार्थनाध्यवसायेराध्यमानत्वात् क्रियायाः कर्मत्वावद्विशेषणस्य कर्मत्वमिति कश्चित् । उभयथापि वि
शेष्यवचनस्य स्तोकशब्दस्य द्रव्यवचनत्वात् तृतीयादिप्रसंगात् एवनास्तीति किमर्थं करणग्रहणमिति चेत् । दूरांतिका
र्थैः शब्दे योगे षष्ठी विभक्तिर्भवति अन्यतरस्यां पंचमी वा शेषत्वादेव षष्ठ्याः सिद्धत्वात् सूत्रे पंचम्यर्थमेव वचनं । नन्वेवं विनाप्य राम
न्यतरस्यां ग्रहणं षष्ठीमात्रविधौ मा च वचनवैयर्थ्यं मा भूदिति प्रकृतायाः पंचम्या अपि सामर्थ्याद्विधानं भविष्यतीति चेत् १७॥
। वचनसामर्थ्यात्पक्षकृत विधावाश्रीयमाणेत्तृतीयाया अपि पद्यदिनानाभिः तृतीयान्यतरस्यामित्यत प्रभृति तायाविधि

भिः स्यादित्यन्यतरस्यां ग्रहणं पंचम्याः समुच्चयार्थं तेन दूरया मा तदूरं ग्रामस्येति भवति। ननु समुच्चयार्थे ऽन्यतरस्यां ग्र
हणे तृतीया कस्मान्न पराड्डयेन तामपकृष्य पंचम्येव तेन समुच्चीयत इति चेत् एवमपि विनेत्यत्रान्यतरस्यां ग्रहणेन पंचम्या
समुच्चीयते इत्युक्तत्वा दिहाप्येकप्रकरणत्वा त्तत्समुच्चयस्यैव न्याय्यत्वा दिति दिक्। दूरान्तिकार्थेभ्यो द्वितीया च। दूरान्ति
कार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति पंचमी च तृतीया समुच्चीयते दूरं दूरात् दूरेण ग्रामस्य। असत्ववचनग्रहणम
नुवर्त्तते तेन सत्ववचनेभ्यो यथाप्राप्तं विभक्तयः। दूरः पंथाः दूराय पथ इत्यादि भवति। ननु दूरात् ग्रामस्येत्यत्र पूर्वसू
त्रेणापि पंचम्येव भवति यथास्या दूरात् ग्रामादिति दूरशब्दयोगे पंचमी मा भूदिति तस्याः प्रतिषेधो वक्तव्य स्तथा प्रयोगद
र्शनादिति चेत्। दूरादावसथान्मूत्रं दूरात्पादावसेचनं दूराच्च भाष्यं दस्युभ्यो दूराद्वक्रुपिता गुरोरित्यादौ दूरादावसथ
स्येत्यर्थे आवसथादेः पंचमीदर्शनाद्दूरात्प्रतिषेधानुपयोगात्। दूरादावसथा दित्यावसथस्य दूर इत्यर्थाद
धिकरणे पि दूरान्तिकार्थेभ्य इति पंचमीदर्शनात्प्रातिपदिकार्थमात्र एवेदं विधानमिति नेयं। अविचारिता परा
धाः परानुपकुर्वन्ति किलोपकर्मिति शीलाः। न पुरस्कृतः प्रकृत्यात दपि तदर्थ्यवद्ध्वलवदिति।। पराधाः परानुपकुर्व
ते किलोपकृतिशीलाः। न पुरस्कृतः प्रकृत्या तदपि तदर्थ्यं व यद्यपि विभाषा सुपो वक्तव्य पुरस्कादित्यनेन प्रकृतेः प
र्वविधाना त्परत्नो वद्भ्लनं भवति तथापि प्रकृत्या न पुरस्कृतत्वाद् इति तु नव्यपेति। तत्र पुरस्कार भावो वक्तव्या लोके

दृष्टं रूपस्य बह्वादेस्तत्रोपचर्य्योच्यते तादृशोऽपि बहुवचप्रत्ययवस्तस्याः प्रकृतेरर्थमीषदसमाप्तः॥ पटुर्वैहृपटुरितिस्वा
र्थिकत्वादनुवदतीत्यर्थः स्वप्याचोपरक्तिशीलानामपेत्यभावोपत्यपरापराधमविचार्य्योपकुर्वत्येवेति॥ विभाषा
सुपोबहुच्पुरस्तात्तु॥ ईषदसमाप्तिविशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिकात बहुच्भवति सच पुरस्तादेव न परः॥ अत्रम
हाविभाषावाक्यासिद्धेर्न्नतदर्थं विभाषाग्रहणं किंतु न तिङः तेषामवकाशातकल्पवादीनन कशो बहुवचमाना
धतामित्येतदर्थं सुबग्रहणं तुईषदसमाप्ताविति पूर्वत्राप्यसर्वनाम्न इत्यनुवृत्तेरुत्तरत्रच तिङः स्येत्यस्यानुवृत्ते
रावश्यकत्वादिहापितदनुवृत्त्यातिङः तात्स्यान्नन्याम्नदित्येवमर्थं ननु पदिसुबग्रहणं क्रियते वदावहूपरुवइत्यत्रांतो
दात्तत्वं चितः सप्रकृतेर्बह्वकजर्थं इत्यविचनात प्रकृत्यवयवत्वेन जसः प्राप्नोति पटुशब्दोकारस्य चेष्यते प्रातिपदि
काद्युत्पत्त्यनुत्पत्त्यस्यातजसः प्रकृत्यवयवत्वाभावादितिचेत्॥ सुबंताद्बहुचि कृते प्रकृतिप्रत्ययसमुदायस्य बहु
पटवइत्यस्यार्थवत्वादप्रत्ययो न त्वा प्रातिपदिकसंज्ञायामंतर्भूतायाः पूर्वोत्पत्त्याया विभक्तेर्लुकि
कृते पटुशब्दोकारस्योदात्तत्वसिद्धेः॥ प्रातिपदिकसंज्ञानंतरं उत्पन्नस्य जसः प्रकृत्यवयवत्वाभावाद्धोदात्तत्वाप्रसंगा राम
त्॥ नच कृत्तद्धितसमासाश्चेति समासग्रहणस्यार्थवत्समुदायस्यचेत्संज्ञातर्हि समासस्यैवेति नियमार्थत्वात्प्रकृ १८
तिप्रत्ययसमुदायस्य संज्ञा कथमिति वाच्यं प्रकृतिप्रत्ययसमुदायस्य संज्ञा समासग्रहणान्न निवर्त्तं पतिइत्य

स्वार्थिस्याप्रत्यय इति प्रतिषेधे न ज्ञापनात् स्वप्रात्वप्रत्यय इति प्रतिषेध एव वैयर्थ्यं स्यात्। तुग्रहणं तु पुरस्तादेव सर्वं
भवतीति नियमार्थं कोर्थः पूर्वमेव न सर्वं भवति प्राग्गुणाभ्यन्तरे ये लिंगवचने च तदुत्पत्ते विप्रत्यये भवतीति ते नेईषदस
माप्तो गुडो वद्गुगुडो द्राक्षा वद्गुपपीपवायुरित्यादि सिद्धं भवति। ननु स्वार्थिको वद्गुच् स्वार्थिकास्तु प्रकृति। वो लिंग
वचनान्यनुवर्त्तंत एवेति किं तुग्रहणेनेति चेत् उच्यते। एवं तर्हि सिद्धे सति यत्करोति तुग्रहणं तज्ज्ञापयत्यतिवर्त्तंते
पि स्वार्थिका लिंगवचनानीति इति। तथा च गुडकल्पा द्राक्षेत्यादि सिद्धमिति दिक्॥ अर्थिसमेताः समपेपद्यपिबद्ध
नोपितद्धिताः संति॥ विरलः सकोपिय स्माउदपतिसततं समाश्रितातिशयः।७। तेभ्यो र्थिभ्यो हिताहितकारिणो
बहवः संति अपूर्वत्वात्तेषां दूरभाजो भवंति बहवः किंतु समाश्रितानां नित्यप्रसारितकराणां निराश्रितानां दाने
मानादिसत्कारैरतिशयः प्रतिष्ठाद्यतिशयः सततमनुदिनमेवात्यंतपरिचयादनादरीहीणामपि यस्मादुदय
तिस विवेकी विरल इत्यर्थः। शाकुपर्देतु। अर्थिनो लक्षणया अर्थप्रत्यायने धावेन स्वदर्पितेः प्रयुक्तमानास्तद्धितप्रत्ययाः से
त्पणा द्य यो बहवः किंतु यस्मात्तद्धितप्रत्ययात्समाश्रि तस्य प्रकृतिभागस्यातिशा पउ देति स्वार्थिकस्य द्योतकत्वात् प्रकाशते स
तमवादिर्विरलः परिमितएवेत्यर्थः। ननु शुक्लतरः पटइत्यत्र प्रकृतिभागः शुक्लशब्दः सदाभिधेयगुणं गुणोत्कर्षप्रधान

सं० उ०
।।२६।।
1.9

सन्निधौ न स्वोपकारापेक्ष इति व कथं तत्प्रकर्षः सा पत्र च न गुणाभावस्तत्र भवति प्रकर्षयोग उच्चतरः शब्द इति यथा
।तथा च कथं प्रकृतिभाग स्यातिशयः शब्दे संभवात् दृष्टैकार्थे विभाष्यत इत्यपि न युक्तं।।शुक्लतर इत्यत्र शुक्लशब्दार्थे
पटे प्रकर्षाभावात् जातिगुणक्रियाद्यात्मकस्य वस्तुनः स्वातन्त्र्येणाभिधीयमानस्य प्रकर्षयोगो नास्तीति प्राप्य
कृताभिधानादिति चेत्।। सत्यं।अभिधेयविशेषणेनोपात्तस्य शुक्लादेर्द्रव्यस्य प्रकर्षसंभवात्तत्प्रकर्षद्वारेणापव
रितो द्रव्यस्य स्वतोऽप्रकृष्टस्य प्रकर्षः शुक्लतरः पट इत्यादौ शब्देनाभिधीयते। तदुक्तं।। हरिणा। द्रव्यस्याव्यपदेशस्य
य उपादीयते गुणः। भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते। अरूपं पररूपेण द्रव्यमाख्यायते यथा। अप्रकर्षं प्रकर्षे
ण गुणस्यापीष्यते तथेति। यद्यपि द्रव्ये संति गुणा बहवस्तथापि शुक्लतरः पट इत्यादावेतरगत्वात्प्रत्ययः प्रवृत्ति
निमित्तगुणप्रकर्षाश्रय एव। पाचकादिक्रियाशब्दे तु स्वाप्रवृत्तिनिमित्तमिति तत्प्रकर्षाश्रयः प्रत्ययः। जातिशब्देभ्य
स्तु जातेः प्रकर्षाभावात्तत्सहचरितप्रसिद्धवाहदोहादिप्रकर्षे प्रत्ययः। न च जातेः प्रकर्षाभावे गोतरो गोतरेत्यादिकं कथं सि
द्धेदिति वाच्यं। तत्रापि गुणप्रकर्षात्। तथा हि। गौरयं यः शकटं वहति गोतरोऽयं यः शकटं सीरं च वहतीति गौरियं या समां
तत्कर्मणां। तथासतिपचादीनामपितद्विवक्षयासामकर्मत्वनिर्वचनकार्यप्रसंगः। नवपञ्चादिवद्दानतदृशयणाम्रक 1
पकर्मकत्वमितिवाच्यं। धात्वर्थनामकर्मणाकाङ्क्ष्यपदार्थत्वात्तत्रचक्वचित्कर्मसंबंधेदर्शनेनसारूप्यात्तएवेतइतितत्वेप्रत्यय
विषयानांकर्मकत्वव्यपदेशभाजोभवंतितथाचात्यंतनमविद्यमानादिकालत्वंकालादिकर्मणः कापिनशक्यवचनमि
56 तिसामर्थ्यात्तद्व्यतिरिक्तकर्मनिषेधः किंच। अकर्मकस्थलेंतरंगस्यद्रव्यकर्मणएवनिषेधोनवाह्यस्यकालादिकर्मणः
अंतरंगत्वंतुद्रव्यकर्मणाक्रियायाः अथमैमसंबंधात्परिमाणादिज्ञानार्थेपश्चात्तः। वालसंबंधइतितस्यवाह्यत्वमिति
दिक्। प्रथमचतुर्थ्योगतिवुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ। अर्थशब्दः प्रत्येकंअभिसंबध्यते
। गत्यर्थानांबुध्यर्थानांप्रत्यवसानार्थानांचधातूनांतथाशब्दकर्मकाणांकर्मकाणांवाणयंतानांयेकर्तासणयंतानां
कर्मसंज्ञोभवति। गच्छतिमाणवकोग्रामं। गमयतिमाणवकंग्राममनीवह्योःप्रतिषेधः। नयतिभारंदेवदत्तः नाययतिभारं
देवदत्तेनयद्यपिदेशांतरप्रापणवचनोवहिर्निगपत्यर्थइतिनगतिहिंसार्थेभ्यइत्यत्रभाष्यकारेणोक्तंतथापिगुणभा
वेनागतिगतिःप्रतीयतइतिप्राप्तप्रतिषेधः वहेरनियंतृकर्तृकस्येतिवक्ष्यामीतिचोपक्षेपः वाहयतिपवानवलिवर्दान राम
अत्राणोवलिवर्दाः कर्तारोण्यंतेतुनियंतासारथिः कर्तातत्रनिविधोरितिप्रतिषेधस्यप्रतिषेधाद्विधिरेवभतिवुभ्यर्थः ५६
वोधयतिमाणवकंधर्मंप्रत्यवसानमभ्यवहारः भुंक्तेमाणवकंदनंभोजयतिमाणवकंओदनं। अदिखाद्योःप्रतिषे

धः। आवलिपतिं माणवकेनोदानं। स्वादपतिमा माणवकेनोदानं। मन्त्रे रहिंसार्थस्य प्रविषेधो वाक्यः। मन्त्रपतिपि
डो देवदत्तः मन्त्रपतिपिडो देवदत्तेन। गत्यर्थादिषु प्रत्ययेण हेतुमणिकए वसं भवाद्धेतुमणि चो दिधि रिति प्रतिषेधोपि
प्रत्यासत्ते: क्रत्ये वन्याप्य इति कुरो लिलिजंतो प्यणं तएवेति न द्वैः आशि: हिंसार्थस्य लुभ मन्त्रपतिवलीवर्दौ न सस्य मिति द्वेत्रस्यानोस
स्यानो भक्षणे हिंसा भवति। अशोह घासस्या वा चेतस्या भ्युपगमात्॥ परकीयं च भक्षणे यतो हिंसितो भवतीति हिंसो भोभक्षणे वा भवति
वर्त्तते। शब्दकर्म॥ अध्यापयति माणवकं वेदं। अकर्मका आसयति देवदत्तमिति दिक्। गणपतिनोपकारश्च धर्मानासंबं
ध॥ कर्त्तापि कार्य ते चेणएवं ते कार्य्य तइति करः क्रियत इति चार्थमाश्रित्य सूक्तिः। प्रवर्धमाना धर्मितः कं न ये तिनी ननीचतां। न
पतित्पं तनुवृध्यपी स्वतंत्रं वरतंत्रतो॥१३॥ तंत्रशब्दः प्रधानवचनोपि दृष्टः स्वआत्मा तंत्रं प्रधानं यस्य स स्वतंत्र इति प्रधानभू
तो स्वतंत्रशब्दस्य प्रसिद्धतरत्वात्कारकाधिकारे क्रियाविशेषयेस्वातंत्र इति प्रधानभूतो स्वतंत्रंत्रशब्दस्य प्रसिद्धतरत्वात्का
रकाधिकारे क्रियाविशेषपेस्वातंत्र्यं ग्रहणं क्रियायां स्वतंत्रं प्रधानभूतं कर्त्तारमपि कर्मभावापादनेन परतंत्रतां नापतीत्स
र्थः। ननु कारकांतरतिरस्कारेकथं कारं क्रियामाहेतुं मलं कर्त्तीपितत: कथं प्राधानपतीत्यर्थः। ननु कारकांतरतिरस्कारेक
थं कारकं क्रियामाहेतुमलं कर्त्तीपितत: कथं प्राधानवाच्यो युक्तिरस्त्वेतिचेत्। अत्रोक्तम भियुक्तैः प्रागन्यतः शक्तिलाभात्न्य
ग्भावापादनादपि। तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्त्तनात्। अदृष्टत्वात्प्रतिषेधे प्रविवेकपि दर्शनात्। आकारहृष्युपकारित्वे

स्वातन्त्र्यं कर्तुरिष्यत इति। करणादिशक्तिसुक्तिः काष्ठादेः कर्त्रा प्रवर्तितस्य कर्तृत्वस्य प्रागेव शक्तिमत्त्वात्। स्वम्भावः करणादेः
कर्तुः संनिधौ। कर्त्रधीने कर्तुराख्येत्यादौ च प्रविवेकराणां धर्माभावे केवलः कर्ता दृष्टो नैवं करणादीनि तथा चाराद्दृष्टपक्वोदिर
त्वे तरस्य तमा फलसिद्ध्युपकारित्वे करणात्तद्व्यनुप्रवेशाभावेऽप्युक्तरीत्या स्वातन्त्र्यं कर्तुरित्यर्थः। वस्तुतस्तु अगुणसावेन प
57 दार्थो व्यापादो धातुनोपादीयते। स कर्तेति तदेव स्वातन्त्र्यम् एवं च रथो गच्छतीत्यादावचेतनेनानुपपत्तिः स्थालीपचतीत्यादिप्रयोगो
पपत्तिश्चेति दिक्। बुध्यर्था धातवो विधीमंतो वाच्यत्वेन धियः सत्वादिति दिक्। पुरस्काराभ्ययोगप्रश्चेति रस्कारं क्वचिदतः। तथा हि
तद्धितो भूत्वा वक्रुचितं देता ।१४। हितो हितकारीतस्य हितद्धितोऽयेन तिरस्कारः कृतस्तस्य हितवाकारीव लोके भूत्वा न्यचितेत। वक्रु
मुचितं यत्तद्धोपयुणादितं देवं वदेत नकुतदीपदोषान्कीर्तयेत्। अपि स्वतिरस्कारो। देवं नेचापमानं च मचेति सात्त्रप्रकाशये
दितिन्यायादित्यर्थः। तथा कृते सति तत्क्षणे सोऽपि लज्जितो भवति पुरस्कारे सादराधिपं दधातिलोका अपितु ष्वं तिमाना
पमानसाम्येन सीता वतिरापि परितुष्यतीति भावः। वक्रुवदिति। यथा वक्रुचपरस्य यः प्रत्ययः परश्चेति वचनात्पुरस्कारयो
ग्योऽपि विभाषासुपो वक्रुव्युरस्ता दितिवचनात्र पुरस्कृतो यदापि प्रकृत्यात्तथापि तद्धितस्तद्धितसंज्ञो भूत्वा वक्रुपडरित्याद
वीषदसमाप्तिरूपमनुचितमर्थे चिसदेत्यर्थः। ननु प्रकृतपामहाविभाषयो च वक्रुचामुक्तेवाक्यसिद्धो किमर्थे विभाषासुप राम
इति विभाषाग्रहणमिति चेत्। उच्यते अक्रियमाणे विभाषाग्रहणे तिङन्तेभ्य अवकाशान कल्पादीनानवकाशो वक्रुवच ५७

मावाधाता। यितिविभाषाग्रहणं सुपग्रहणं तु पूर्वत्र प्रातिपदिकात्तिङः। तावत्तिङश्चेत्यनुवृत्त्या यथाकल्पादयः सिध्यंति तथा
बह्वृजपि तदनुवृत्त्या ततो मा भूदिति ङ्याप इति ज्ञेयं। ननु तिङश्चेति निवर्त्तनीयमिति चेत्। अप्रत्ययसर्वनाम्नामित्यप्र
चकीत्यादिसिद्ध्येतस्यावश्यमनुवर्त्तनीयत्वात्। नन्वादिसुबग्रहणं क्रियते तदा बह्वृश्बह्वृत्त्वत्स्वं तस्य बह्वृचि वीक्षीय मान
मतो हातत्वे जसः प्रसङ्गे तपटुशब्दोकारस्य चेष्यत इति चेत्। बह्वृचि कृते प्रकृतिप्रत्ययसमुदायस्यार्थवत्त्वात्प्रातिपदिकसं
ज्ञायां पूर्वोत्पत्रायां विभक्तेर्लुकि पटुशब्दोकारस्योदात्तत्वे चितः प्रयुक्ते बह्वृकजर्थमिति वचनात्भविष्यति न च तत्राप्रत्यय इ
ति प्रातिपदिकसंज्ञानिषेधः समुदायात्सुपो विधानाभावेन प्रत्ययान्तत्वाभावात्। यावत्समुदायस्य संज्ञा मा ततो विभक्तिरप्योत्पत्र
त्वान साप्रकृत्यवयववदिति न तस्योदात्तत्वप्रसंगात् न च कृत्तद्धितसमासाश्चेति समासग्रहणस्य समासस्यैव प्रातिपदिकसमुदायस्ये
ति नियमार्थत्वात्प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न स्यादिति वाच्यं प्रकृतिप्रत्ययसमुदायस्य समासग्रहणेन संज्ञा
निवर्त्तते इत्यप्रत्यय इति प्रतिषेधेन ज्ञापनात्। अन्यथाप्रत्यय इति प्रतिषेधेन ज्ञापनात्। अन्यथाप्रत्यय इति प्रतिषेधोऽनर्थकः स्यात्
विभाषा सुपो बहुच् पुरस्तात्त्विति तु ग्रहणं पुरस्तादेवस्यैव भवति तीन यमार्थे तेन प्रकृतिगतेरेव लिंगसंख्ये बह्वृगुणे ज्ञाते स्ये च
मादौ भवतः ननु ईषदसमाप्तिः प्रकृत्यर्थविशेषणं तेन ईषदसमाप्तोऽयं प्रातिपदिकं तस्मात्स्वार्थे कल्पबादय इत्येषां बह्वृचः
स्वार्थिकत्वं स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तन्त एवेति किं तु ग्रहणेनेति चेत्। सत्यं तु ग्रहणं कुर्वन्नाचार्यो ज्ञापयत्य

तिवन्निते अपि स्वार्थिकालिंगवचनानीति। ज्ञापनप्रयोजनं च गुडकल्पा द्राक्षेत्यादिप्रयोगसिद्धिरिति दिक्॥ एकेनावमतो पि
स्वोचितमन्यत्र याति सत्कारं। संख्यावानेकत्वमुपैवाच ज्ञातोऽध्यर्धस्सुद्व इव। १५॥ संख्यावानपि डितः केनाप्याविवेकवचना
चेदवमतो न सत्कृतस्तर्हि न खेदस्य वशमात्मानं नयेद्यावतान्यत्र केपि विवेकवशंगताः संतिसेतस्त्वेऽस्यस्तु योग्यं पू
जामधिगच्छेदेव। यथा संख्यासंज्ञावानध्यर्धशब्दः संख्याशब्दाद्द्वितीयमानेनैकत्वमुपावज्ञातोऽयद्यपि तथापि संख्या
58 वत्त्वात्कन्नादिकार्ये संख्योचितं प्राप्स्येदेवेत्यर्थः। नन्वध्यर्धशब्दस्य संख्यात्वात्स्यादेवैकत्वमु जिति। तदेव त्राउच्यते। अध्यर्ध
ग्रहणं च समासकन्विध्यर्थमिति वार्तिकेन वक्ष्यमाणवतः इति प्रोक्ते सत्राध्यर्धशब्दस्य संख्यासंज्ञा निर्दिष्टा सा चावश्यकीकथ
मन्यथाध्यर्धशूर्प्पमध्यर्द्धकमिति समासकन्विधिः स्यात्तत्राध्यर्द्धकं सइत्यत्राध्यर्द्धशब्दात्प्रातिपदिकात्तरस्याहीयप्रत्ययस्य द्विगुत्वा
देव लुकः सिद्धो रध्यर्द्धपूर्वद्विती गोलुगसंज्ञा मित्यध्यर्द्धग्रहणमनर्थकं पव लुकि चिदस्य संख्याकार्यं न भवतीति ज्ञापयति तेन कृत्वसुजभावः
सिध्यति संख्यात्वोचितं च समासादिकार्यं भवतीति तद्वृत्तिकारस्तदाश्रयेणोक्ते स्मृतिः वार्तिककारादियं तु न कार्यमध्यर्द्धग्रहणं द्विगुत्वादेव लु
कः सिद्धेस्सघोचोक्तयध्यर्द्धग्रहणं समासकन्विध्यर्थे लुकि चाग्रहणमिति। ननु द्विगोः परस्य तद्धितस्य यदि लोपस्तर्हि द्वाभ्यां शूर्पाभ्यां राम
क्रीतं द्विशूर्पं शूर्पेण क्रीतं द्विशौर्पिकमित्यादावपि लोपप्रसंगस्तत्परिहारायतन्निमित्तग्रहणं कर्त्तव्यं द्विगोर्निमित्तं यस्तद्धितस्तस्यार्थः। ५८
द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्प्पमित्यत्र तु तद्धितार्थो द्विगुरित्यधिद्वारेण तद्धितो निमित्तं द्विगोर्भवतिभवति लुकद्विशूर्प्पेण क्रीतं द्विशौर्पिक

मित्यत्र तु नैवमिति लुगभाव इति। स संख्याद्विगोरित्येषा न पंचमी किं तु संबंधषष्ठी। तत्र यौगिर्यपिलक्षणस्य पंचम्यापि सिद्धत्वात् तद्वस्याश्रयण
स्मिन्सामर्थ्ये कृतेऽङ्गत्वान्निमित्तभावलक्षण एव संबंधोऽत्र गृहीष्यत इति न द्विगोः षिक इति सामान्यलुक् प्रसंगः। नन्वेवं द्वयोः शूर्पयोः समाहारो
द्विशूर्पी द्विशूर्प्या क्रीतं द्विशूर्प्यमिति न स्यात्। तद्धितस्य समाहारद्विगुनिमित्तत्वाभावेन लुकः प्रसंगाभावादिति चेत्। उच्यते यथा वेमास्य
मिति विग्रहे अविकशब्दाट्ठक् इति प्रत्ययो भवति न पेहाप्यविकशब्दन्यायेन द्विशूर्पी विग्रहवाक्यमेव भवति प्रत्ययस्तु द्विशूर्पशब्दा
देव भविष्यति। तावत्यपि द्वाभ्यां शूर्पाभ्यां क्रीतमिति द्विशूर्प्यमिति शूर्प्याः क्रीतमिति त्रिशब्दमिह यत्साधनं तस्मिन् द्विगुरेव स्यादिति। न
न्वं क्वचिदविरविकन्यायेनेति पाठस्तत्राविरिति दृष्टांतेतोपन्यासः। यथाविरविकन्यायेन न द्वारेणास्य पमुत्पादयति। ननु स्वयं तथा
तयमवीत्यर्थः। अथवात्राविरित्यस्य विभाक्तं तस्यानुकरणमविरिति ततोनुकार्येणार्थेनार्थवत्त्वाद्धि भक्तिरुत्पद्यते तस्याट्ठं ढो तन्भावा द्यो
यो न तु पूर्वस्यानुकरणत्वादनुपपत्ता नावा यथा अस्यवामीयमिति षष्ठ्यालुग्भावः। अध्यर्द्धपूर्वाद्विगोर्लुगसंज्ञायामित्यसंज्ञाग्रहणं
न वेत्यत्र स्यपोतसंज्ञेति प्रत्ययांतविशेषणं तद्धितकाराभ्या चक्षतेतेन पंचलोहितीति कं पंच कलापिकमिति परिमाणविशेषसंज्ञायां
लुग् भवति। वार्तिककारस्तु सन्निधानाद्द्विगुविशेषणत्वमकाम्य पंचलोहितिय पंचकलापशब्दौ द्विगुकृतद्धितलुकावेव संज्ञो। न स्वयमा
णाप्रत्ययोततो नार्थः संज्ञाप्रतिषेधेनेति मन्वानः प्रत्याख्यातवान् संज्ञाग्रहणमिति दिक्। गुणवचनोवदत्रमतां लमनेन प्रायेण सर्व
स्य॥ अर्षिहदिहेमापूर्वं गुणवचनाद् ब्राह्मणादेर्प्रिता ॥ १५ तस्मात्सर्वस्यापि गुणानेव वदेत्र कस्यापि दोषं कीर्त्तयेदिति भावः। यथा क्रि

ऋपदीक्षमिवशीकर्तुंजगरेकेनकर्मिणोरापवादसत्सेभ्योगोदरंतीनिवारयेति।ऋषिरितिऋषिःपाणिनिर्गुणवचनब्राह्मणादिभ्यः
कर्मणिचेत्यत्रसूत्रइत्यर्थः।पंचमप्रथमोगुणवचनब्राह्मणादिभ्यःकर्मणिवगुणमुक्तवंतोगुणवचनाःगुणवचनेभ्यःशब्देभ्योब्रा
ह्मणादिभ्यश्चषष्ठीसमर्थेभ्यःकर्मणिपमिधेयेष्यञ्प्रत्ययोभवतिचकाराद्भावेच।कर्मशब्दःक्रियावचनःजडस्यकर्मभावोवाजाड्यं
54 ब्राह्मण्यंब्राह्मणादिराकृतिगणः।आदिशब्दःप्रकारे।आपादसमाप्तेःकर्माधिकारःचतुर्वर्णादिभ्यःस्वार्थेउपसंख्यानेचत्वार
एववर्णाश्चातुर्वर्ण्यंचातुराश्रम्यमित्यादिक्।अथतेनगुणेनैवप्राज्ञोवर्द्धयितुंयेत।सेपदिकपरिभाषेवगुणवृद्धिविधौनप्र
ति॥१६ गुणाःश्रुतशीलादयस्तेषांवृद्धावाधिकेविधिःअपलोयेषांतेतथातान्प्रतिसंपल्लक्ष्मीःस्वयमुपेतीत्युचितक्रियापदाक्षे
पः यथोक्तंनोदत्वानर्थितामेतिसलिलैःसवपूर्यते।आत्मातुपात्रतांनेयःपात्रमायांतिसंपदइति।इकपरिभाषेवेतियथा
इकोगुणवृद्धीइतिइकपरिभाषापरिभाषारंगविध्यंगभूतत्वान्निर्दिष्टेगुणोमञ्जेर्वृद्धिरित्यादिगुणवृद्धिविधौनप्रवृत्तिइकपदोप
स्थापनस्वरूपापारमर्षिसंधायथावर्ततिनचेत्यर्थः।अन्यत्रवक्तव्यमुक्तमुपकारप्रशंसायांततोवगंतव्यं।तमविष्टनाविवपरं
नविनातिशयंप्रतिष्ठास्यात्।तद्धजाकृत्यकृतुपकारप्रशंसायांततोवगंतव्यं।तमविष्टानाविवपरंनविनातिशयंप्रतिष्ठास्यात् राम
।तद्धजातिद्वेवभूयोगुणवचनादेवसाभवति।१७परमाधिकमतिशयंगुणादिविषयंविनालोकेप्रतिष्ठानस्यादतःप्रकर्षायधी ५८
मताविधेयोविधिरित्यर्थः।तमविष्टनाविति।यथातिशयनेतमविष्टनावितिविधुधीयमानोतमविष्ठनौप्रत्ययोप्रकर्षवि

नभवतत्स्वेत्यर्थः। भूयः पुनः साम्यतिशायस्यपि प्रकर्षे साधुर्यादिगुणयुक्तादेव वचनाज्ज्ञायते। ननु परुषे एव चस्मात्तस्य तद्विरो
धित्वादित्यर्थः तदज्ञादीइति। तो अज्ञादीतिदज्ञादीइष्टे यमुनोयस्यैयथा गुणवचनादेवभवतोज्ञादीगुणवचनादेवेति सूत्रात्स
त्यपि प्रकर्षे नास्यतस्य थेत्यर्थः। ननु अज्ञादीएवगुणवचनादित्यपि नियमः संभवतितत्कथं गुणवचनादेवेति नियमो नियत अ
अयितुं शक्य इति चेत्। उच्यते गुणवचनादज्ञादीएवेति नियमेष्वेजनादीगुणवचनात्रस्यात्तो मित्येताद्दशनियमनिवर्त्तन मि
ष्टतोवधारणम धिगंतुमेवकरूः क्रियते तेन गुणवचनादेवेत्येव नियमः प्राप्यते न चैवकारं मंतरेण नियमो दुरापस्त्याच प्रकर्षे ज्ञायो वि
नादप्रकर्षे विधिर्यस्यादिति नियमसामान्यस्याधकादेवकारालभ्यमिष्टतोवधारणं लभ्यमिति वाच्यं स्वरितत्वादिति ज्ञापनस्यानुवर्त्तिना
तत्रैव पुनर्विधानासिद्धे विधिरारम्यमाणे नियमार्थ इत्येवकारमंतरेणापि नियामकता या मे तया सिद्धायामेवकारस्येष्टतोवधारणा
र्थकतया प्रत्ययनियमोयं न प्रकृतिनियम इति सिद्धं॥ स्वामम्यर्थसंपन्नो पराधीनस्य किंतु स्वेच्छ इष्टमेधिगंतुं चेत्र राजपदामर्थवे
वत॥ १८॥ पघयितत्र पदं पुरुषार्थविशेषणं भूतेनार्थेनार्थवतयापि पुरुषपरपराधीनतया तु यमितद्विशेषणं संवेधिमष्टमपि नाधि
गंतुं शक्नोतीत्यर्थः। समर्थमाश्रितः को वा न समर्थं मिधेदिह। समर्थो विधिरयुक्तः समर्थपदसंश्रयात्॥ १९॥ समर्थानि पदानि सं
श्रयोयस्यासौ समर्थपदसंश्रय स्तत्र मावप्रधाननिर्देशेन सामर्थ्यपदसंश्रयत्वादित्यर्थः। समर्थः पदविधिरित्यत्र कर्मसाधनो वि
धिशब्दो विधीयत इति विधिस्तत्र शेषषष्ठ्या पदानां सतां यत्कार्यं विधीयते स पदविधीत्यः समर्थः सन्नसाधुर्भवतीत्यर्थः सवानुप

पपन्नः कार्ये सामर्थ्यस्योपपादयितुमशक्यत्वान्न तच्च समर्थपदविधिशब्दयोः सामानाधिकरण्यसमर्थपदाश्रयत्वाद्विधिरपि स
मर्थ इत्युपचारेण समर्थनीयमिति भावः ननु पदविधिः समासतद्धितवृत्त्यादिः समर्थः सन् साधुर्भवतीति तिसामानाधिकरण्ये मु
ख्यवृत्त्या संभवति किन्तूपचारेण यावता स्वकार्यसाधनोद्धुरे समर्थशब्दो रूढः तत्रानुशास्यत्वेन प्रकृतानां लौकिकवैदिका
शब्दानां स्वार्थप्रतिपादने सामर्थ्यमस्त्येवेति समर्थशब्दोपादानं सामर्थ्याभावात् तत्रे विग्रहवाक्यार्थेभिधाने समर्थत्वं पर्य
60 वस्यति । तथा च राजपुरुष इत्यादिसमासवृत्ति विग्रहवाक्यस्य राज्ञः पुरुष इत्यस्यार्थाभिधाने समर्था भवति समानार्थत्वा
दिति विग्रहवाक्यार्थाभिधाने समर्थ एव समासादिः पदविधिः साधुर्भवतीति सूत्रार्थ इति चेत् । सत्यं एवं हि प्रयोगात एव स
मर्थ्यमवसेयं स्यात् त्वियं वृत्तिरिमं वाक्यार्थमाख्यातु शक्येन वा नरिममिति सूत्रादवगन्तुं शक्यमित्युपचारो गीक्रियते । समर्थ
शब्देन च ये नेरूढस्तत्राचक्षः पदविधिः समर्थानां संबद्धार्थानां संसृष्टार्थानां च पदानां वेदितव्य इत्यर्थः तत्र संबद्धार्थता न्योन्यापे
क्षरूपा व्यपेक्षा वाक्ये पदानां सामर्थ्यं आकाङ्क्षा योग्यसंनिधिमतां एष नामन्योन्यसंबंध इति यावत् तथा हि वाक्ये राज इति पदाद
नियतसंबंध्यपेक्षयोद्भूतसंबंधिविशेषाणामावमापन्नो राजार्थः प्रतीयते पुरुषार्थस्य प्राधान्यमापन्नः प्रतीयते राजा च योग्यसंनि
हितं पुरुषमपेक्षते पुरुषश्चावच्छेदकत्वेन राजानमपेक्षते स्वाहृयिति । इतो तु संसृष्टार्थता एकार्थीभावः सामर्थ्यं । राजशब्दे राम
दो पि पुरुषार्थमावष्टे इति तत्र पोरेकार्थीभावो भवतीति दिक् ।। केनाप्युपायेन सदाकृपोत्संगतिमुत्तमेः । लीलयैवोद्धतां धत्ते ९०

रिदंतेपदुपोत्तमं ॥२०॥ यतयस्मात उपोत्तमं रिति तिसूत्रे राज्ञादीनामेत्यमुत्तमं यंतस्यसमीपमुपोत्तमं करणीयमि
त्याह ऋगुह्रं तामुदात्रतायेति । तथा चयत्र त्रोदात्तत्वं स उत्तमसंगतेम हिमेत्यर्थः । षष्ठी प्रथमे उपोत्तमं रिति । रिदंतस्यो
पोत्तममुदात्तं भवति त्रिप्रभृती नाम त्यमुत्तमं तस्य समीपमुपोत्तमं ननु रिति दूर्व मित्येव किं नोच्यते तावता मत्वं ते ङ्गी लिं
गसंज्ञायां विषयं पूर्वीकारस्यो देवतीरावतीत्याद्युदात्तं विधाय के मते । पूर्वमात्संज्ञायां ङ्रियामिति सूत्रे पूर्वग्रहणमितरथा तु
हत्तेरकत्रेत्वे स्यादिति चेत उच्यते । चकारेस्य तरस्यामित्यत्रानुवृत्त्यर्थमुपोत्तम ग्रहणमन्यथा मा हि दत्व दित्यत्र द्वयोरपि चङ्के ते
न्यतरस्यामुदात्तः स्यादिति हि किं विभाषा बाधेद्द्ध्यो रिति च उद्देशः । सूत्रः परानुरोधेन द्वंद्वा छिद्दे त्ववर्तितुं । योधत्ते परवल्लिंगे
प्रधानमपि सर्वथा ॥२१॥ परउत्कृष्ट उपजीव्यत्वद्वितानुवर्त्तनेन वर्तितव्यमिति वृत्तेत्यर्थः । यद्वा । परस्य यस्य कस्यापि चित्रमनु
रूपं वर्तितव्ये पराभिप्रायानुरूपमेव वर्तितव्यं न तु कस्यापि पित्रं कृत्वा पि विषये सौ द्वेगं विधेय मित्यर्थः । भोजनाच्छादना
दिकार्ये धनार्जनादौ व्यवहारे वा कठिन्यमपहाय परच्छंदानुवर्तनेन सर्वे । तरा त्यासीतापतिः परितुष्टो भवेदिति भावः । उक्तं च ये
न केनाप्युपायेन यस्य कस्यापि देहिनः । संतोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनमिति । योधत्ते इति यो द्वंद्वः सर्वथा सकलपदार्थ
मा धान्यभाग पि परवल्लिंगं द्वंद्व तत्पुरुषयोरिति वचनात मयूरी कुक्कुटौ कुक्कुट मयूर्या वित्यादौ परस्योत्तरपदस्य यल्लिंगं तद्व
ल्लिंगं धत्ते इत्यर्थः परवान् पराधीनस्तस्य लिंगं चिह्नं परवल्लिंगं सर्वथा प्रधानमपि सन् पराधीनतामेवावलंते यस्ततो द्वं

द्वापद्इति दर्शनेऽवयवार्थव्यतिरिक्तः समुदायो द्वंद्वार्थः स चावयवलिंगेनैव लिंगवानित्यपि दर्शने तत्रोभयपदार्थ
प्रधाने द्वंद्वे युगपदुभयलिंगताया असंभवात् । पर्यायत्ते लिंगप्रसंगे परवल्लिंगं द्वंद्वतत्पुरुषयोरिति यदि नियमार्थत
या तत्पुरुषे परवल्लिंगता पानिपमासंभवेन विधेरेवासुपेयत्वे विधिनियमे प्रयोगरूभयोरप्येकवाक्येकारेवचनव्यक्तिने
दप्रयोगसंगः । किंच । द्वंद्वतत्पुरुषयोरिति सप्तमी तथा च द्वंद्वे तत्पुरुषे च परस्यं तद्वल्लिंगं भवतीत्युक्ते कार्यिणमनुपाद
नात्संबंधिशब्देन परशब्देनाक्षिप्तस्य पूर्वपदस्यैव कार्यित्वं स्यात्तत्र यद्यपि पूर्वकापइत्यादौ तत्पुरुषे परस्येव लिंगं पूर्व
पदेन स्वकीयमिति परलिंगेति दिष्टे समासस्यापि तु स्त्रिंगत्वमेव संबंध्यते न तु प्रधानपूर्वपदसंबंधिनपुंसकत्वं गुण
कर्मणि यो बिल्वरूपाविल्वादि द्वंद्वे च परपदार्थस्य लिंगे पूर्वपदार्थस्यातिदिष्टे समासस्यापि नपुंसकत्वे पुंल्लिंगत्वं चजायते
न तु पर्यायेण लिंगद्वयमिति स्यादिष्टासिद्धिस्तथापि म पूर्वी कुक्कुटो कुक्कुटम एर्व्याविल्वादौ पूर्वपदार्थस्योत्तरपदार्थलिंगा
तिदेशात्स्त्रीप्रत्ययस्य निवृत्तिप्रवृत्तिप्रसंगः अथ द्वंद्वतत्पुरुषयोरिति षष्ठी तथा च न पूर्वपदस्यातिदेशप्रसंग इत्युच्यते । त राम
हि विधिनियमयोरेकवाक्ये गीकारादुक्तवेदप्येकः प्रतीकार इति चेत् । उच्यते । अवयवार्थव्यतिरिक्तः समुदायो द्वंद्वार्थः स च ६१
स्वय लिंगेऽस्त्यइति दर्शनमाश्रयणीये तत्र यथाजातीयकमुत्तरपदार्थस्य लिंगं तथाजातीयके द्वंद्वार्थस्य भवतीत्येवं
लिंगमस्ये तस्मिन्नि विधिरेव तत्पुरुषे च परदाप्युत्तरार्थस्य लिंगं तथाजातीयके द्वंद्वार्थस्य भवतीत्येवं लिंगमस्ये तस्मि

न्विधिरेव तत्पुरुषे च पदस्योत्तरार्थे प्रधाने प्राधान्यादेव परवल्लिंगं सिध्यति तथापि पूर्वपदार्थे प्रधाने ऽर्द्धपिप्पलीत्यादौ वि
ध्यर्थमित्यत्रापि विधिरेवेति नैवं रूपमिति। ननु परिशिष्टायां प्रयोगे द्वन्द्वतत्पुरुषसमासार्थयोः परवल्लिंगातिदेश इति
पूर्ववदश्ववडवावित्यत्रापि समासार्थस्य पूर्वपदार्थलिंगातिदेशः प्रसज्यते न तूत्तरपदार्थस्य ततश्चाश्ववडवावित्यत्रोत्तरप
दार्थे स्त्रीत्वं न निवृत्तमिति दोषः। अवर्णं कुर्वीरिंस तस्मात् प्रयोगेणेतु पूर्ववदश्ववडवावित्यत्रापि पूर्वपदार्थलिंगमुत्तरपदार्थलिंगा
तिदेशः प्रसज्येते न तूत्तरपदार्थस्य ततश्चाश्ववडवावित्यत्रोत्तरपदार्थे स्त्रीत्वं न निवृत्तमिति दोषः। अवर्णं कुर्वीरिंस तस्मात् प्रयोगे
तु पूर्ववदश्ववडवावित्यत्रापि पूर्वपदार्थलिंगमुत्तरपदार्थस्यातिदिश्यत इति वडवाशब्दस्य पुंस्त्वातिदेशाट्टापो निवृत्तिः स्या
त्पत्र। वार्थे द्वन्द्व इत्यत्रानेकमित्यनुवृत्तं प्रथमानिर्दिष्टमित्युपसर्जनत्वाद्गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वमश्ववडवावि
हलं त्यत्र न विष्यति परवल्लिंगं द्वन्द्वतत्पुरुषयोरित्यत्र तु लिंगशब्देन लिंगाभिधायी प्रत्ययो गृह्यते तत्र लोके प्रयोगे सति रागो वा च्यते तथा च द्वन्द्वतत्पुरु
षार्थस्य च परस्यैव लिंगं भवति लिंगाभिधायी प्रत्ययश्च परस्यैव भवतीत्येवं शब्दार्थयोरतिदेशस्याश्रयणे ते न कुक्कुटम
यूर्यो नित्यत्रापि गोस्त्रियोरिति ह्रस्वे प्रथमयोः पूर्वसवर्ण इति न भवति ततश्च ङ्यो पदेशी कदीर्घाभावे तत्कृत विधयातिदेशिका
स्य स्त्रीप्रत्ययस्याश्रवणं सिद्धं तत्र सति दीर्घाद्वचीति प्रतिषेधाद्दीर्घाभावः पुनर्न ह्रस्वत्वं तु न भवति तदन्तस्य प्रातिपदिक
त्वात्॥ द्विगागार्ग्यायणो द्वात्रकारीषगन्ध्येत्यत्र तु कृतह्रस्वत्वे समासान्तः पुनः ष्यङो प्रसंगो न दोषाय भस्यात्वे तद्धित

इति पूर्वो सञ्ज्ञयो निवृत्त्योः कर्त्तुं शकत्वादिति तथा। दत्ताव पुवति श्च दत्ता पुवती त्यत्र [illegible] कृते शब्द शब्दार्थयो रति देशात्पुन
स्त्रिप्रसज्योमत्वा भावात्स्वं वद्रावाभावेति शब्द रूप अव [illegible] प्रसंगात द्वंद्वे कापि स्वापि [illegible] कल पदार्थप्राधान्ये त्वपसर्जन सं
ज्ञाया अन्व यितया रूस्वता या अपि गंतुमशक्यत्वाचेति चेत। उच्यते। विभाषा द्वंद्व [illegible] त्रात्र्य वडवा पूर्वापरा धरोत्तराणामि
62 तिवक्तव्ये टापोनुद्वारणं निपातनमित्यश्ववडवयोर्द्वंद्वे टापनि वर्त्यते। ननु पूर्वं वदश्ववडवाविति निपातनं किमिति ना श्रीपत इति
चेत्। अश्ववडवा विति द्विवचन निर्देशादश्ववडवानश्ववडवैरिति बहुवचनांतरे पूर्व पदवद्गाति देशस्या प्रसंगात इति दिक्। द्वि
गुप्ताप्राप्तापन्नालं पूर्व गति समासेषु प्रतिषेधः परवल्लिंगता पावकव्यः पंच कपालः। प्राप्तो जीविका प्राप्त जीविकः। आ
पन्नाजी विकः। अलं कुमारि। निष्कौशाम्बिः। न वक्तव्यः प्रतिषेधो यावता परवल्लिंग द्वंद्व तत्पुरुषयोरित्येव तावदेव सूत्रं क्रियते तत्पुरु
ग्रहणं न क्रियते पूर्वश्चासो वायश्च अर्धचासो पिप्पलीचेति कर्मधारय एव पूर्व कायोर्धपिप्पली त्यादिषु मा विष्यति पूर्वापराध
रेत्येकदेश समासाद्भ्यंतरे णापीष्ट सिद्धेः सोपिनारभ्यते। तत्र यद्यपि पूर्वादीनामेकदेशे वृत्तिः कायादीनां तु समुदाय इति राम
सामानाधिकरण्यं दुर्घटं तथाप्यवयवे समुदायो पचारान्नु पपत्तिः काय पूर्वं इति षष्ठी समासरूवमभिधाना त्रयं विप्पती ६२
पुली। प्रीतेरं तरंगे क सत्वते: प्री तिरी ति वक्तव्यो हेनाशीत्वेत विवक्षाः।२२। अन्यत्रामपदार्थ वद्वलाप्रा। तियि स्यो ताद्दशादिस

र्थः ॥ अन्तरंगेऽनुवर्तिपरेष्वेकस्याधारणे सत्कृते सत्कारोपस्येत्यर्थः प्रीतिमन्यत्र करोति सत्कारं पूर्वं पदप्रकृतिस्वरादिकं
नुवर्तिपदानामेव करोतीति वृत्ती हि त्रैकस्यापि पत्र प्रीतिस्तत्र न यावन्तो वक्तृत्वी हैन्नप्रीतिरिति शिष्टे तस्सतिसामर्थ्ये दाना
दिसत्कारविहितां प्रतिनकेनापि कुर्यादिति पाठता वृत्ती हि रिवान्यत्र प्रीतिमानपि नीतिमान ॥ स्वकीयात्रावत्तानीयात्का
र्यकालापनापिता ॥ २२ ॥ स्वकीयाभ्रात्रादयः कार्यकानापिनीतिमान ॥ लेखुरवेदुःखेवानपलापेतइत्यपलापिनस्तानन्यत्र
पथग्जने सत्यामपि प्रीतौ नावज्ञानी पादानमानादिना सत्कृपादेवयथावद्वृत्ती हिः समासोऽन्यपदार्थप्रीतौ तत्राधान्यात्स
त्यामपि स्वीकीयाच त्रिपदार्था वत्रात्रज्ञानेतिवर्त्तिपरे पूर्वप्रकृतिस्वरादिसत्कारकरणात्र यानीतिमानपीत्यर्थः ॥ अत्र वक्रव्य
मुक्तमुपकारप्रशंसायां ॥ बाधमानोन्यसमम्येन ख्यातं केनापि बाध्यते ॥ लुनीतइत्यत्र परस्त्रेदाहरणं स्वरः ॥ २३ ॥ लुनीतइत्य
त्रधातुस्वरोपः आमस्वस्य बाधकोपो विकरणस्वरो धातोः परस्मिन्विकरणे प्राप्तः स्वात्परः सततः स्वोत्पत्तो बाध्यते तत्तो
वश्यं परपीडापामाहितमनाः केनापि पीडनीय एवेत्यर्थः इदं दृष्टान्तरूपं ॥ लुनीतस्वरामित्यत्र आस्वरबाधकम्नसः स्वरोपि
आमस्वरेण बाध्यते ॥ उक्तं च ॥ श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां ॥ आत्मनः प्रतिकूलानि न परस्य समाचरेत ॥ न पापे
प्रतिपापः स्यात्साधुरेव सदा भवेत ॥ आत्मनैव हतः पापो यः पापं कर्तुमिच्छति ॥ दृष्टं हिंसोनु दहति हतमेवानुहंति च ॥ मृते
मारणे ते चैव पः पापे पापमाचरेत ॥ महामोहहतं पूर्वं पो जंतुं हति हतमेवानुहंति च ॥ मृतमारणते चैव पः पापे पाप

माचरेत्ता महामोहहतं पूर्वं पोजितं तु हतिनिर्दिष्टः समेस्पनरकं पतिन्नशं सोस्तमारकः। नोद्यमा नो पि पापेषु मुद्दात्मा न
प्रवर्त्तते। वायिमाणो पि पापेभ्यः पापात्मा पापमिच्छति। तेसाध्वः सुज्ञान्मान स्तेरिपंभूषिता वभूः। अपकारिषु भूतेषु पेम
वं ह्यपकारिणः। दुःखिते स्मोपि भूतेभ्यो स्तत्क रोगजरादिभिः। भूयः को दुःखम परं मध्यतोदातुमिच्छति॥ दुःखं दद्दाति योन्यस्य ध्रु
वं दुःखं स विंदति। तस्मात् न कस्यचिद् दुःखं दातव्यं दुःखभीरुणेति यावदसमाति विचारयन्निरुक्त दृष्टांत त्वन्यपद्विन्नत्कापि विषये कोप्यु
द्वेजनीय इति भावः। ननु लुनीत इत्यत्र धातु विकरण सार्वधातुकानामुदात्तत्वं प्राप्तं तत्र धातुस्वरं आस्तुरो बाधते तं च तसः स्वर
इत्यत्र को हेतुः पितो नुदात्तं पदमेकवर्जमिति परिभाषया दात्त स्वरितविधिर्मिरेकीभूत पानिघाते विधीयमाने वक्तव्यं नामुदात्तत्वप्रा
प्तौ क एको वर्जनीय इति विचारे परनित्यांतरंगापवादैः स्वरैर्व्यवस्था पो पस्थिन्सति शिष्ट्यते स तस्य बाधको भवति। इति सति
शब्दे न च व्यवस्थां गीकृतातत् यावप्रकृते धातुस्वरे सतिशिष्टः प्रत्ययस्य स्वरस्य बाधको पि भवतितथा तसः स्वरस्यापि प्रत्य
तस एवाबाधकः स्यात् इति दृश्यते हि लुनीत स्तरा मिइस्यत्र सति शिष्ट आमः स्वरस्तरपः स्वरस्य बाधक इति चेत्। सत्यं। ता
स्यनुदात्ते ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमङ्नोरिति तासः परस्य लसार्वधातुकस्य यदनुदात्तत्वं शास्त्रितं तदापयत्व राम ६३
वार्थः सति शिष्टो पि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति। अन्यथा कर्त्री राविस्याहोल मात्रपेतत्त्वा हं तरेगेष्ठु
लादेशेषु स त्सु लकार विशेषापेक्षत्वे यश्चात्तासो कृते सति शिष्टे तत्स्वरे शेषनिघातेनेव सिद्धे रनर्थकं तस्यादितिदिक्। का

63

त्वं प्रतीवृत्ते परैर्वाध्यमानो ऽपि धीराधीः ॥ किं न धातुस्वरो जातु बाध्यते प्रत्ययस्वरं ॥२४॥ विविधावस्था प्रदर्शिको हि
कालः कदाचिन्नामप्यवस्थां प्रदर्शयेद्यस्यामनिशं वाध्यमानो ऽपि रिपुः स्वेन वाधितुं शक्येतेति न कदापि स्थिरमतिः
पुमान्नतिति ह्रातिस्यजेदित्यर्थः । अत्रैवार्थान्तरमाह किं नेति । जातु कदाचित् धातुस्वरः स्ववाधकं प्रत्ययस्वरणोपायपतीस्व
ऊ प्रत्ययोत्तावस्थायां सति शिष्टत्वात्किं न वाध्यते पि तु वाध्यत एवेत्यर्थ इति दिक् ॥ देवोवकाशो विषये स्वकीये कस्यापि नो
ति विद्याविवार्य्यदन्नावकाशोपजनता वरो हि ततस्तमुत्सारयति प्रसारः ॥२५॥ अविवार्य्येति परस्य चिन्नवृत्तिमपरीहेत्यर्थः
एतदेवार्थान्तरन्यासेन स्पष्टयति । दन्नावकाश इति अविवार्य्येत्येतदिहापि संवध्यते हि यस्माद्दलुङ् लुङ् लृङ् लङ्
उदात्तइत्यागमेन स्वस्यानित्यतां संप्रसारणे परत्वाज्जावं चाविवार्य्य प्रसारोपजादित्वात्प्राप्तः संप्रसारो दन्नावकाशः स
तोपजनतेस्तमत्यजादित्वसंपादनार्दैत्यतेत्याद्दतुत्सारयतीत्यर्थः । ननु ऐङपतेत्यादौ लुमात्रापेक्षत्वादंतरंगत्वादादेशाल
कारविशेषमनेगे चापेक्षमाणो वहिरंगो डागम इति लादेशो सत्यनंतरं विकरणोपकनित्यत्वाद्भवति कृते विकारेण वि
करणेतस्यागस्पतस्मिन्कृते तुधातुमात्रस्येति शात्वात रप्राप्तेरटो न नित्यत्वं षष्ठीनिर्दिष्टस्य पदस्थितेत्रे आगमआदे
शो वा तत्रैवं परिभाषा तेनादिकृते साकाद्भवतोपकः शब्दान्तरात्प्राप्तवत्त्वविधिरनित्य इति कल्पनया नानित्यत्वं ॥ सन्निधाने ।
कृते तु विकरणो ऽसंप्रसारणमेवाटः पूर्वकृताकृतप्रसंगित्वेन नित्यत्वाद्भवति कृते तु संप्रसारणे जादित्वादाटः प्राप्तेर

टोनप्राप्तिरित्यनित्यत्वादेव सनम्भवति। तत्किं मिथ्येवयशोवकाशोदत्त्र इत्यत्र हि निधीयते संप्रसारणे च तदीपोपद्दतो
विषयइत्यपपशो मिथ्येव निधीयत इति चेत्॥ सत्यं। अटावेदद्वाधितस्तु हि संप्रसारणस्य किंनद्दिताववतासं प्रसा
रणपेत्न मनियत्यत्वमट आपातं यथा वालिसुग्रीवयोर्युध्यतोर्लीलाकलितललितमालुमीलविग्रहो निग्रहं सुग्रीवो
ग्रजस्यपरिहृतवान्समगवान्नलक्ष्मणाग्रजस्तावतानसुग्रीवापेक्षया वालि दुर्बल इति सारविदो विदंति तथा नटोपियु
क्रमनित्यत्वमपि धातुमतएव यस्य यनिमित्तं लक्षणं तदेणा विहन्यते न तदनित्यमित्यपि पुरुषोक्तिस्तथा च यस्य
निमित्तं लक्षणां एरेणा विहन्यतइति वचनमसार्वत्रिकमिति तत्र वर्गणय्यस्यानित्यतां विचारपता डागमेन सार्ध
64 पेणवस्वविषयेदत्तः संप्रसारणं पावकाशइत्याशयात्स्तथा निधीयते तत्र दोषः। ननु तादृशमडागमं सत्प्रकर्षमपि
पद्याधमानोरूपं वाडागमो गमितः प्रेक्षावद्भिस्तपेक्षायात्र तां सूत्रप्रत्याख्यानात्कथं पूर्वोक्तस्मादिति चेत्। आड
जादीनामिति प्रत्याख्यातं भाष्यकृता सूत्राकारस्य तु मास्माभूभाव यडागविति तदा अयेण तथा निधाना तानन्वा
डागमेगतेकथमाटश्चेति विद्धिस्तदेकथणयर्वतीसतीवास्यानधारयेदिति चेत्॥ आटश्चेत्सन्निधीयमानाद्धि वो राम
लिवनितेवगतेगुरोर्लघुमटमेवसुग्रीवमिवसमाश्रयिष्यति। न चेवमकाधीदित्यादावपि अतिप्रसंग इति वाच्यं ६४
। अवीत्यनुवृत्ते रगादेतद्विधानात्। स्वयेर्लुङि सिपि अद्गागपिगालवयोरिति सपोडागमे कृते ह शिवेत्कत्वे अस्य

पोहसतीत्यत्रनुधातावग्रहोवृद्धिविधानान्नभविष्यति धातुग्रहणं तुनाधिकमुपसर्गादृतिधातावित्यस्यैव पूर्वत्रापकृ
र्षणात्॥ अरटश्चेतिचकारोत्रेविध्यंतरंबाधित्वावृद्धिरेवभवतीत्यस्यार्थस्यसमुच्चयापतेनातोग्रहणइतिपररूपमार त्रित्य
त्रनभवतित्यथाओओयतओकारीपदित्यत्रउस्रापदांतादोमाङोश्चेतिपररूपत्वेसिद्धांतेपिनभवति। ननुछंदस्यपि
दृश्यतइत्यस्यार्थमाछत्रीयंस्तेनसुरुचोवेनआवरितिसिध्यतीइतिचेत्। पुरुषोनारकइत्यत्रेवचांदसमटएवदीर्घ
त्वंभविष्यतिनन्वेवमास्त्रित्यत्रअसोरलोपेजादित्वाभावान्नाटोवृद्धिस्यादितिचेत्।लावस्थापामटिकृतेतरंगत्वाह्यादे
शेवसतिवृद्धलोपयोःप्राप्तयोर्वृद्धिरिमचंधातुवायेज्ञतेलोपस्कधातुमकारंअगप्रत्ययेङितंचापेज्ञतइतिवद्धये
त्तोसंतुष्टइवनप्रथमसंभावनायोग्यइतिवृद्धावंतरंगत्वेनादःकृतापामल्लोपेसतीष्टसिद्धेः ननुवर्णादांगवलीयइ
तिपरिभाषयाश्रापितबलोलोपःकथमिवावगतापितुंशक्यतइतिचेत्।वर्णांगयोःसमानाश्रयत्वएनास्याःपरिभा
षायाःप्रवृत्तेःकृतायांतुवृद्धौतपरकरणादल्लोपोनभवति।इणोधातोराप त्रित्यत्राल्कृतेवृद्धिरिणोयणितिपरत्वादेश
स्यबाधुतस्तत्रांतरंगत्वाद्वृद्धिरटश्चेतिनयतिकृतायांचतस्यामणोपणएरितियोगविभागाद्दिकारांतस्येणोपखिवधा
नादेकस्यादेशोसतीष्टसिद्धिः संग्रहश्लोको॥ अजादीनामटासिद्धिर्वृध्यर्थमपिचेदट। अस्तयोःहसतीत्यत्रधातोर्वृद्धि
मटःस्मरेते। पररूपंगुणेनाणमोमाङोरुस्मितत्समं। छंदोर्थवद्भलेदीर्घएस्यांतरंतरंगतइति। मैत्रीमत्रइपवित्रांहृहृद्पदेष्म:

कुकुद्दपो धीर्थं। अन्योन्यार्थी विहितं नैपानि स्वार्थेन बाधति।२६॥ लक्षस्य ग्रोधा विल्वत्रक्ष हृपदं न्यग्रोधार्थे सहितमेव स्वार्थ
समीहते न केवलं न्यग्रोधपदं वेवं लक्षपदार्थसहितं स्वार्थमिच्छति न केवलं पुगपद्धिकरणवचने द्वंद्वविधानादिति
दिक्। अत्र वक्तव्यमुक्तमुत्तरप्रसंगे मायां। गतिसंज्ञा इव प्राज्ञाविनयो नीचतां गताः। लिङंतद्वदशोभंत उदात्तगुणशा
लिनि। २७॥ उदात्ते गुणोः शोभमानमानव विषये विनयान्नीचतां गत एव प्राज्ञा विचारचतुरा नराः शोभंते तस्माच्छोभा
मिहलोकपरलोकयोरिच्छुरुदात्तगुणावलम्बनं प्रति न कचिदपि कार्ये मनागपि मानेन विस्मपादितिभावः तिङंत इति। य
था। पचत्र करोतीत्यादौ निपातैर्यद्यदीति वचनेन तिङ्तिङ इति प्राप्तनिघातनिषेधात् उदात्तवति तिङंते गतिसंज्ञकाः प्रादय
स्तिङि चोदात्तवतीति सूत्रेण विहितनिघाता नीचतया शोभंत इत्यर्थः। ननु तिङि चोदात्तवतीति सूत्रे तिङ्ग्रहणस्य किं
प्रयोजनं कृदंते तु गतिकारकोपपदादिति कृत्स्वरेणैव निघाते न गतिर्विहन्यत एव न चामंद्रैरिंद्र हरिभिर्याहि मयूर
रोमभिरित्यत्र रक्तप्रत्ययांतत्वेनांतोदात्ते मंद्रशब्दे आङनुदात्तोपमा इतिति तिङ्ग्रहणमिति वाच्यं पिनाकिशब्दवदृति
शब्दस्य संबंधिशब्दत्वात्सर्वे धिक्रियापेक्षेत्रिक्रियावाचिन एवोदात्तवतो ग्रहणाद्धक्रियायुक्ताः प्रादयः उपसर्गसंज्ञा भव
तीत्यति वचनात्स्वकृते मंद्रशब्दं प्रत्याङः क्रियायोगाभावाद्याहिशब्दं प्रति तद्योगेन गतिसंज्ञासत्वात्। हंतैवं यस्य क्रिया राम
याक्रियायान्वयव्यतिरेकाभ्यां यस्य वाच्या क्रियातं प्रत्यर्थद्वारा योगे सति गतिसंज्ञेत्यर्थात्प्रकृतिभागस्यैव क्रिया ६५

65

वाचित्वात्तस्मिन्नेवोदात्तवति गतेर्निघातविधानाद्यत्र प्रपचतीत्यादौ एवं गतिर्निहन्येत गतिसंज्ञानिमित्तक्रि
यावाचिनो धातोरेवोदात्तवत्वात् पुनर्यत्प्रकरोतीत्यादौ प्रत्ययोदात्तत्वेनोदात्तवति निघातः स्यादिति परिमाण
मेव श्रेयः तिङ्ग्रहणे कर्तव्यं सति वतास्मिन्प्रत्ययोदात्तेनाप्युदात्तवति तिङन्ते गतेर्निघातः सिध्यतीति चेत् प्रपचतितरा
मित्यादाववमंत स्याम स्वरेणोदात्तवतस्तिङन्तत्वाभावात् तिङ्ग्रहणे सति निघाताभावप्रसंगात् सति तु तिङ्ग्रहणे क्रि
याया क्रियेति कर्मधारय आश्रयणीये क्रियालक्षणमर्थं प्रति गतिसंज्ञया मर्थे च कार्यासंभवान्नदाचिनि शब्दे वरतः
कार्यविज्ञापमानं क्रियाप्रधाने सर्वस्मिन् सिध्यतीति प्रत्यकरोती इत्यादौ प्रचपतितरामित्यादौ च निघातो गते दुर्गतेवर्षप
सीव सिध्यतीति किमर्थं तिङ्ग्रहणं इति सत्यं। गतिकारकोपपदानां कृद्भिरेव समासो नान्येन स च प्राक्सुबुत्पत्तेरिति दृष्टी
ने आमंतस्य गतिसमासाभावाल्लघेकस्वरो माभूदिति पचपचपतितरामित्यत्र गतिनिघात एव साधनीयः स चोक्तरीत्याति
ङन्ग्रहणे सति न सिध्यतीति कार्यमेव तिङ्ग्रहणं पदातुग लाहीनामविशेषेण समासो भवति कृद्भिः प्राक्सुबुत्पत्तेरि
तिपक्षस्याश्रयं तेन प्रशब्दस्य समासे तत्स्वरूपे तुल्यार्थे तिरर्व पदप्रकृतिस्वरे सति शेषनिघातस्त्वत्र तथा च यस्मात्क्रि
यावक्रियते त्वाश्रयेमालोपमकरोतीत्यत्र गतिसिद्धये परिमाणमेवधारय तिङ्ग्रहणं सप्रयोजनमेव पदाद्गतिकार
लोपपदात्कृदित्यत्र कृद्ग्रहणं प्रत्याख्यापतेतदोत्तरप्रकृतिस्वरे शेषनिघातः प्रशब्दस्येति न तिङ्ग्रहणमासिद्धेरिति दिक्

।अत्र भवत्यपो तिङि चोदात्तवति तिङन्ते उदात्तवति परे नो गतिरनुदात्तो भवति। तत्पच पचति पत्क्रोति लिप्याते पिघदिहहे तक्र
वितते न तवे घृणा कश्चिद्यत्रयुक्तः। पतत्यदिहेत क्वचित्। नेतवेतवा। क्वचित्। यत्र इत्येते निपाते युक्ते तिङन्ते नानुदात्तो भवति
।चण् इति। णिदिति शिष्टस्येदर्थे। अपं वकरिष्यति। अपवेत्करिष्यतीत्यर्थः। सत्तु द्यपायो द्वकारादेश्वार्थं। आमन्त्रेरिद्धेहेरिभिर्यहि
1 महरोमभिः। मात्वा केचिन्निपमन्विन्न्पाशिनो तिधन्वेवं तोऽहि। हेइन्द्र मंद्रैर्यादवित्व मिमिह प्ररोम मदृशा रोम युक्ते हरिभि
रश्वैस्त्वया याहि। यज्ञं प्रत्यागच्छ केचिद् पिजमाज्ञात्वा मा नियमनगमन प्रतिबंध माकुर्वतीत्यर्थः। नकार इवार्थे यथा पा
।शिनो व्याधा विं यच्छित्वा गच्छंमेनिगच्छंतिअत एतात्प्रतिबंधका नतीत्या निक्राम्य यथा धनं च धनुष्याः वस्तु समूहमतिक्रम्य
66 यात्पीव मिहि। आनच्छेत्यर्थः। वरं देशा यस्य सततं त्वक्रं वाजी वितिवरं। गतेरिव ननीच त्वमुदात्ते तु परप्रति। २८। यथा परमुदात्ते
तिङन्ते प्रतिनीच नमामालेत्पपत्यपचती। अत्र गतिर्लिष्टतियथा परे वे हिरण्यमुदात्ते उष्टं प्रतिननीचता भवलं यस्ये य मित्यर्थः।
इत्यप्रकर्षवृत्ति नम्रुरावपि तद्दिते पिजनः। वैयाकरणाइवा मो शिव शिवमानो देहिं तुं न मते। २९। अपि कलिकालोद्भवो वनो
असुरो पित्रा द्यवपितद्धिते तस्मेधमादिना द्विलुकुर्वत्यपि द्रव्यस्य धनस्य प्रकर्षवृत्ति शिव शिवेति स्वरेण न मते के नाप्युपासे राम
नधनं नाशयिनुं समीहतइत्यर्थः। यदि विवादेरपि न न्नमते तर्हि किमु वक्तव्यमन्यस्या न्येस्त्वमपि द्रव्यं न न्नमेत इत्यत्रत्वत ६६
स धनं वा न संग्रहे धियमविधाय सततं व्ययशील एव भवेदिति भावः। आमइवेति यथा आमुप्रत्ययस्य दीर्घत्वे नयुस्संज्ञेत

तद्धितसंज्ञेव द्रव्यप्रकर्षे वृत्तिविधानं वैयाकरणाः अद्रव्यप्रकर्ष इति वचनात्र सहंतरस्यार्थः। पंचमचतुर्थे किमेत्तिङव्ययघादाम्द्रव्य
प्रकर्षे किम एकारांतात्तिङः अव्ययाद्वयो विहितो घस्तदंतात्स्याति पद्धिकात अद्रव्यप्रकर्षो अमुप्रत्ययो भवति पद्यपि द्रव्यस्य स्वतो न
प्रकर्षयोगः क्रियागुणयोरेव तद्योगात्तथापि क्रियागुणस्य स्वस्य तस्य पदाद्द्रव्य उपचारस्तदापं प्रतिषेधस्तथा वोद्वे स्तरस्तरूरित्ये
व तत्र भवति क्रियागुणयोरेव प्रकर्षे प्रत्ययः किंतरां किमतां। एतमाह्नेतरां। पूर्वाह्नेतरां तिङ्श्च पचतितरां। अव्यय। उच्चैस्तरां। [illegible]
श्रोढिरयोगशास्त्रविषये श्रीविश्वनाथः सुधीर्यद्धीमेतमस्फुटशोभनमसारं भावरं भाषुतं।। श्री[illegible]स्य साधु विहितो। श्रीराम
चंद्राभिधाभाजस्तस्य कृतौ समापदधिवाङ्नामसर्गोऽष्टमः ।। ।। इतिश्रीमत्स्वनेकविद्वदन्तेवासि। वंदितयादारविंदस्य महाराष्ट्र
ज्ञातिमंडन ।। ।। श्रीगणेशायनमः अथ[illegible]। उदात्तपरस्मारूढे सिविते पिचिरं तिङि। उद्यतानगतेर्ज्जनाकिं सध्यति
विनाविधिं ।।१।। यत्प्रपचतीत्यत्र यद्वाद्योगो तिङ· तिङ· इति प्राप्तनिघातस्य निपातैर्यद्यदीति निषेधात्तिङ· त उदात्तरूढं त्वं तत्से विनोपि
गतेयद्दितिङि· चोदात्तवतीति निघातविधानात्रोद्यतातर्हि तत्र्यविधिः प्राक्तनं कर्मैव हेतुर्न केवला सेवा महत्त्वे दातुं प्रभवति स्पर्धः
उक्तं च महाभारते। पूर्वदेहकृतं कर्म न कश्चित्पुरुषो भुवि। बलेन प्रज्ञया वापि समर्थः कर्तुमन्यथा। अन्यच्च शास्त्रगर्भिण्या धियाधी
रोर्ध्वमीहते। स्वामिवत्प्राक्तनं कर्म विदधाति तदन्यथेति।। असत्कल्पसहायोपि लघुतालिंगितोपि वा। अडागम इवोदात्तो नु कु
लविधिनानकः ।।२।। तस्मात्कर्मैव पुरातनं सुखदुःखोपपत्तिहेतुरिति विचिंत्य परलोकहितमेव चिंतनीयं धीमता। उक्तं च। न

कोपि कस्यचित्कर्त्ता शुभे पि वा। स्वर्विजन्मार्जितं कर्मफलं भुंक्ते नरो वशः आगमिष्यंति ते भावा ये भावा मयि भाविताः॥ अदृ
ते रनुगतं ख्योन तेषामन्यतो गतिः। येन यत्र्यौपभोक्तव्यं सुखं वा दुःखमेव वा। स तत्र बद्धो रज्ज्वेव बलाद्दैवेन नीयत इति स्पष्टा
र्थः॥ अनुकूलेन मनविधिना प्रत्ययानामि वाक्षिपः। तद्धर्मी घ्राप्तिर लितः॥ किं परेषां मसूयया॥ यद्यनुकूलो विधिर्दैवं तर्हि
ते प्रसिद्धधर्मादयत्नेषां प्राप्तिरमितः सर्वदेशेपि भवति किं परेषां परिपंथिनामसूयया स्याच्च किंचिदिस्यर्थः। उक्तं च। उप
भोगादृते यस्य नाश एव न विद्यते। प्राक्कृतं च लवत्कर्म कोन्यथा कर्तुमर्हति। तद्यथा आक्केस्तच्छील तद्धर्मतत्साधुकारिषु इति
विधिना आजभासेतिक्विपमभिव्याप्य येप्रत्ययास्तेषां तद्धर्मादीनां प्राप्तिर्भवति तद्धर्मादीनि वद्धजीहित पुरुषयात्नं त्रेराणि
67 हैशास्त्र द्धर्मस्यादिस्तच्छीलत्वं तद्धर्म आदिर्यस्येति साधुकारित्वं च तथा सति लक्ष्यं तत्र तच्छीले साद्यौतदिति धात्वर्थनिर्देशः
फलनिरपेक्षोपः प्रवर्त्तते स तच्छीलो यथा वदिता जनो पवादानिति तद्धर्मोदाहरणं। वधूमूढां मंडयितारः आविष्टाया
ना भवति आक्केसिद्धे आटकृरकात्रा पहर्तारो भवंति देशधर्म इत्येव प्रवृत्तिरितिदिक्॥ आक्केस्तच्छीलतद्धर्मतत्साधुकारिष्वा आज
भासेति क्विप्शब्दना तयानि तत्र एव मनुक्रमिष्यामः प्रत्ययास्तच्छीलादिषु कर्तृषु ते वेदितव्यास्तस्य धात्वर्थे यस्य शीलं स तच्छी राम
लो धात्वर्थो यस्य धर्मः स तद्धर्मो धात्वर्थस्य साधुकारी तत्साधुकारीति दिक्॥ आद्रिष्यचेकहस्माक्रुर्तेहा विधिरधीनमस्य ६७
स्य॥ पश्यपषु दान्तलक्ष्मीः सुपिसंवृद्धैः समुल्लसति॥४ तस्मिन्प्राचीनकर्माधीने संपदापदावितिविचिन्त्यात्मसुखेन पुरुषेण॥

क्षिणि निमील्य मर्षणीयम । विलंब्य कार्यं वेतानी हस्तेऽर्पते गतेस्य स्येव हि न दैन्नः ॥ आयुः कर्म च वित्तं च विद्या निधनमेव
च । यद्वा वित्तानावति नित्यम पलोतो पि पलेन वा पि महत्ता न भवत्य भावि ॥ इत्थं विधातृवशवर्ति नि जीव लोके किं शोच्यमस्ति पुरु
षस्य विचक्षणस्येति ॥ महा णा राज्ञन्निरपत्रामं त्रितप्राप्तमुदान्तत्वं मुवामंत्रितइति परांगवद्भाव विधिना सुवंते निधीयतइत्यर्थ
इति दिक् ॥ अत्र वक्तव्यमुक्तं सत्यशंसायां ॥ जायंतो गुणिसंगेपि विना न विधिना सुवंते न धियतइत्यर्थ इति दिक् ॥ अत्र वक्तव्यमु
क्तं सत्यशंसायां ॥ णाः नीचतेव गतेर्वस्मा दुघते पि परे ति ङि । पा भाग्यं विना संगतिरपि न फलतीत्यर्थः । नित्यमेगा निपुष्पाति पः
स्वकीयानि केवले ॥ अडागमइवोदात्तो विधिना क्रियते पि सः ॥ ६ ॥ सो पि विधिनो दैवेन धनादिना महत्त्वं प्राप्यतइत्यर्थः ॥ अडागमो
प्यभवदित्यादौ स्वकीयमेगमुद्ध्या पुवपं नयति न तु परं विधिना च लुङ् लङ् लृङ् द्वितयने नोदात्तः क्रियतइति साम्य सिद्धिरिति
दिक् ॥ अथ वक्रोक्तिः । गुरुलघुता नवलोका त्किमिह विचित्रं यदवेयत्यज्ञः साम्ये नोटम्मगंवापाणिनिरपि वेदुदात्ततां नयति ॥ १ ॥ आ
उज्जाधिनामि सत्राप्युदात्तग्रहणानुवृत्ते दीर्घलेन गुरोराते प्युदात्तत्वेन घोर टोपीत्यर्थः ॥ ६ ॥ एकोऽप्यय्येषु स्मिन्नुसि द्वार्थोऽ
पि द्विजाः । आमीपशाद्वसदृशोः ज्ञोभमायांतिमत्वरं ॥ २ ॥ यथाऽऽमानो द्वाश्च समानाश्रयेतस्मिन्न्मोमायातीत्यर्थः स्वभाववर्णने मि
दो ॥ अत्र वक्तव्यमुक्तमुपकारप्रशंसायां   किं चित्रं यदि लोका अज्ञाः समर्थपदेष्वेपु ॥ इत्थं ति पाणिनिरपि चेत विविधातस्येव दृत्रि
मिह ॥ ३ ॥ समासतद्धितादिस्त्रूपः समर्थाधिकारात्समर्थस्यैवेत्यर्थः ॥ अथान्योक्तिः ॥ उदात्तपदसे प्रासिसिङ्ड ते कुत्रापपद्यते ।

उद्वृतानुगतस्यापि पत्युरीयापि गतागतेः ॥ १ ॥ यस्य रूपवती त्वत्रानुगतस्य सेवासक्तस्यापि गतिसंज्ञस्य स्त्रीयानि पाताः आघु
दाहाइति स्वसंवेद्यसुपु दान्तता तिडि चोदाहवतीति निघातविधानाद्धते स्पर्थः ॥ यत्सेवया त्व की यमपि नेशपती सं ततो धिक
मधिगंतव्यमित्याशास्ते वेतिभावः ॥ असत्कृत्यगुरुं शासे शास्त्रावेयस्य वर्तीते तदेतन्मध्यमो यत्रेधित्वेनानुचितमनाक ॥ २ ॥ शा
धीस्वत्रक्रसलभ्यो हेधिरितिविधित्वेदीर्घतया गुरुसंज्ञामात्रं शाहावितिसूत्रेण विहितं शामावमसत्कृत्यासिद्धतां नीत्वापयस्य व
र्तीते तन्मध्यमपुरुषे हि शास्त्रमित्रिसोस्त्रेधित्वेमनागपिनानुचितं समानाश्रयस्यासिपस्याभीये सिद्धत्वादित्यर्थः यत्र मध्य
मानुघस्याद्गुरुस्त्रो भवति गुरुसंततिरसत्कृत्य प्रवर्तनेत इत्यत्र किमनुचितमित्यत्र्यप्रत्युक्तिः एतादृशानाध्यायनीयाइत्येतस्यर्थं श्रुति
रप्याह । नयाहि विद्या हवेवा ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि । असूयकायानृजवे यतायनमा ब्रूया अवीर्यवती तथा स्यां
अयसूयकः परापवादशीलः अनृजुर्यस्य मनोवाग्देहेषु समा प्रवृत्तयः विप्रकीर्णेन्द्रियस्त्वयतस्तस्मान्मा गोपाय तेत शेवधिः सुख
निधानमस्मि रक्षणेच वीर्यवती स्याम हमितिकामरूपिणीविद्याब्राह्मणमागत्योक्तवतीत्यर्थः ॥ [illegible] य आतृणत्त्य
वितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कृतमच्चनाह । अध्यापिता ये गुरुं नाद्रियंते वि
प्रावाच मनसा कर्मणा वा। अथैव तेन गुरोर्भोजनीया स्तथैव तान्न भुनक्ति श्रुतं तत् ॥ ३ ॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्र
ह्मचर्योपपन्नं । यस्ते न दुह्येत्कृतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मान्निधिः शेवधिरिति यश्शुचि विद्याः जानीयास्तस्मै ब्रूयाः इत्यते

राम
६८

68

तुक तम ब्रह्म कदाचिद् पिमा ब्रूयाहे ब्रह्मन्मनो निधिपापगोप्त्रे निधिः शेवधिः सुखसाधनं । अत्र शास्त्रकारोक्तो ॥ शासः शास
इ त्येके त्वेवा धनायादेशः कर्त्तव्यो धिकारे सिवोलोपइत्वेवकाधी ति सिद्धये ना श्रियते तेन विधेति सकारलोपे शाधीति ॥ शास्त्रवि
त्यत्र शास हावितिनिर्देशो यवत्वभूतः सकारः अथवा । आ हा विति सूत्रं कर्त्तव्यत्वबाधकआकारः शासे रूपधायामवतीत्यर्थो वि
धेति सलोपः । अथवा न हाविति त्वनिषेधकं सूत्रं कर्त्तव्यं तत्र धित्वे धित्वेति सलोपे च शाधीत्यस्य सिद्धेनेदम् सिद्धवत्रावोदाहर
णमिति दिक् ॥ असिद्धवदत्राभात् ॥ अधिकारप्रसिद्धोयं स्फुरद्धातुसमाश्रितः । हिमाश्रितो भातितरां शाभावो हिमवानिव ॥ १ ॥ हिम
वान्सर्वपर्वताधिपत्येन प्रसिद्धः । शाभाव पक्षे तु प्रकर्षेण सिद्धः प्रसिद्ध नधिकारे प्रसिद्धो धिकारप्रसिद्धः उत्सलम्बोहे धिरिति
धिकारे धि शब्दे शाधीत्यत्र विधीयमानेत्राभीयमानेपेन सिद्धमिति सिद्धकार्यो करणात्प्रकर्षेणान सिद्ध इत्यर्थः । हिम् स्यये परे
विधीयत इति हिमाश्रितो हिमवपक्षे हिमेनाश्रित इत्यर्थः शाभावः शासिधातुमाश्रितो हिमवानत्रैरिकादिनिराश्रित इतिदि
क् ॥ ॥ अथानित्यताप्रतिपादनं । एकाश्रयेपि स्वादीनां आप्त्यानितिपदिके यदि ॥ नाधिरं स्वाश्रयस्तर्हि तत्रास्याकाविवेकिनः
॥ २ ॥ आ प्रातिपदिकादित्यधिकारात्स्वादयस्तदेकाश्रयाः अथ च हल्ङ्याब्भ्यो दीर्घादिति सोलोपविधानान्नचिरं स्वाश्रयः
सोः सुप्रत्ययस्याश्रय स्थिरकालं त्वं न भवति प्रातिपदिकं तर्हि तत्र सुप्रत्ययो विवेकिनो लक्षणद्वयस्य साधुत्वं सुप्रयोगावि
वेकवतो वा अस्या कान कापीत्यर्थः स्वशब्दस्य धनवाचित्वाद्धोधनादीनामेक आश्रयेन लक्षणद्वयादिरिदानीं तनो वाक

।स्थितस्तोपि चेन्न चिरकालं स्थास्नुरयं धना अयं स्याद्धि तत्र धनाढ्यो विवेकवतः का आस्था अस्थास्ये येऽधीने कापीति स्लेषः। उक्तं च पास्त्वसम
निपत्रेपि संध्याव विविक्तं मते। इंदिरामंदिरेन्येषां कथं स्थास्यति सा चिरं। हातव्यं भोक्तव्यं सति विभवे संचयो न कर्तव्यः। पश्येह मा
धुकरीणां संचितमर्थं हरंत्यन्य इति। संपदो हि मनुष्याणां गंधर्वनगरोपमाः। दृश्यमाना नाः क्षणेनैव भवंतीति चेति। ननु यज्ञाते द्वेस्मा
दौ संयोगांतलोपेनैव सिद्धे हलंतात्सुतिसिपां लोपो न विधेयस्तावता च हि हलग्रहणमपृक्तग्रहणं तिस्योश्चग्रहणं हलग्राब्भ्ये
दीर्घात्सुतिस्यपृक्तं हलित्यत्र न कर्तव्यं स्यात् दीर्घग्रहणं दीर्घात्स्योरित्येतावति सूत्रे कृतेपीष्टसिद्धेः। न चाविभर्वनि स्यादौ रात्सस्येति
नियमात् संयोगांतकारलोपो न सिध्यतीति हलंतात्तेरक्तस्य लोपो विधेय एवेति वाच्यं। रात्सस्येति नियमात् संयोगांतकारलो
पो न सिध्यतीति हलंतात्तेरपृक्तस्य लोपो विधेय एवेति वाच्यं। रात्सस्येत्यत्र द्वितकारकनिर्देशेन तत्सिद्धेः यद्येवं कीर्त्यतेः क्वि
पि कीरिति प्राप्नोति कीर्त्त् इति चेष्यते इति वाच्यं। लोके प्रयुक्तानामनुशासनादेतस्य प्रयोगस्याभावेन दोषाभावात्। न चाभिनो त्रेत्य
त्र भिदेर्लङि सिप् अतिसंयोगांतलोपे तस्य दश्चेति रुत्वे परस्मिन्कर्तव्ये सिद्धत्वात् रुत्वे तस्यातो रोरप्लुतादप्लुते इत्युत्वे क
र्तव्ये संयोगांतलोपस्यासिद्धत्वादुत्वं न स्यादित्येतस्यातो रोरप्लुतादप्लुते इत्युत्वे कर्तव्ये संयोगांतलोपस्यासिद्धत्वादुत्वं न स्यादि
ति कर्तव्यः सिलोपो हलंतादित्यपि न युक्तं वक्तुं संयोगांतलोपो रोरुत्वे सिद्धो वक्तव्य इत्यस्यावश्यं वक्तव्यत्वात्। अन्यथा
हश्यो मेदिनं त्वेमित्यत्रापि संयोगांतलोपउत्वे सिद्धो न स्यादिति। अत्रोच्यते राज्ञात स्मादौ न लोपे कर्तव्ये संयोगांतलोप

69

राम
६९

स्या सिद्धत्वात्स कारात स्यपदत्वेन न लोपः प्राप्नोति तस्यासिद्धत्वात्र कार
स्य लोपो न भवति किंच गवास्यदित्यत्र उखाश्रसुः इति स्थिते संयोगादिलोपे पेन नाप्राप्तिन्यायेन पदत्वात् संयोगांतलोपं बा
धित्वा स्यात् ततः प्रसेरवयवो विभक्तिसकारो न भवतीति बहुप्रसुध्वं स्विति इत्वं न प्राप्नोति । तत्र यद्यपि स्वादिष्वसर्वनामस्था
ने पद तीति स्वस्यासाश्रयणात् अपवित्सर्वनामस्थाने परसंज्ञेति व्याख्यानादजादौ सर्वनामस्थाने पदसंज्ञा निषेधे
सोपरतः पदसंज्ञायां सत्यां संयोगादिलोपात्पूर्वं दत्वेन तरनेः संयोगादिलोपः स्यात् तथापि तद्या सति राज्ञा तक्षेत्यादौ कृ
तापूर्वं प्रसंगित्वेन नित्यत्वात् नलोपे सति न तरपरास्मिन् संयोगांतलोपे नलोपस्या सिद्धत्वाभावात् सुलोपो न स्यात् संयोगांत
लोपे सुमतिनलोपो न स्यादित्युभयतः पाशाप्रसंगः तस्मात्ते हलं उत्तरस्य लोपो विधेयः स्वत्रस्तावपि पदमिति पदत्वेन लो
पे प्रसंग सत्यपि तस्यासिद्धत्वात्सुलोपो भविष्यति एवं अविभक्तिवानि स्यादौ रात्सस्येति नियमात्संयोगांत लोपाप्राप्ते
स्त्रिग्रहणमपि कर्तव्यं रात्सस्येत्यत्रास्मादेव ज्ञापकाद्धि तकारकनिर्देशस्य सूत्रकारानभिमतत्वात् संयोगांतलोपो रो
रुत्वे सिद्ध इत्यसनाश्रयणाद भिनोत्रेत्य त्रोत्वे संयोगांतलोपस्यासिद्धत्वमिति सिग्रहणमपि कर्तव्यमेव । अत्र दीर्घग्रहणं संभ
वव्यभिचाराभ्यां आपो विशेषणं तेन निष्कौशांबिरित्यादौ ह्रस्वत्वे कृते न सुलोपः । ननु चाप्रत्ययग्रहणे यस्मात्तत् दादेस्तदं
तस्य ग्रहणमिति तदादिग्रहणादेवात्र न भविष्यतिः न चैवं परमकुमारीत्यादावपि न स्याल्लोप इति वाच्यं । ङ्यापप्रत्यये नुपस

र्जने ष्विङीप्रत्यये तदादिनियमो नास्तीति ज्ञाप्यते तेन वध्वाः श्रेयस्यो ऽस्य वध्वश्रेयसीत्यत्रोपसर्जने पिलोपो भवति। ए
वमर्धपिप्पलीसादावपिलोपो भवति। यद्यपि तत्रैकविभक्त्यावषस्यंतमिति वचनात्तत्रोपसर्जनत्वं यथा श्रीयेनास्मत
एकोऽस्त्रियो रूपसर्जनत्वस्येति कृत्स्नत्वेन भवति तथाप्यप्रधानत्वरूपमस्त्येवोपसर्जनत्वं। ननु आपो विहितस्य स्तो लो
70 प इति विहितविशेषणं विज्ञास्यते किं दीर्घग्रहणेन चेति। यस्मेत्याहो यत्र छद्वाभ्यां हलंताभ्यामेव सुवृत्यते ः स्तस्लोपाना
वप्रसंगात्। हलंताद्विहितस्येति न विध्यतीति चेत्। हलंताद्विहितस्येत्याश्रयणीयः स्यः कइत्यत्रापि लोपप्रसंगादिति दि
क्। १ स्वादेः प्रत्ययचं नो विलोकयेतो ष्पितद्दिलयं। ८ प्रातिपदिकदर्वंगणितलजुाः किंतेमनुष्यमात्या। २। स्वादीनां यना
दीनां लोपमनेकधा पश्यंते पियेस्वादौ प्रत्यये विश्वासं दधति निर्लज्जा कोमेनुष्यतया न गण्णनीयाः किंतु पशुवदेव त इत्यर्थः
प्रातिपदिकवदिति। यथा प्रातिपदिकमम्पादौ स्वादीनां लोपं पश्यद्पिराम इत्याहो श्रूयमाणस्वादिप्रत्ययवद्देवेत्यर्थः। यद्य
पि यल्लोपवन्नत छयमाणस्वादिव यद्य श्रूयमाणात द्वन्नत न्नलोपवन्नमापि प्रातिपदिकत्वे नैकत्वमुरीकृत्य तथापि विवानां यद्वा
समासे यल्लोपवन्नदेववाकेत त्वस्यां दधन्नलजुते इति प्रातिपदिकं यथा न मनुष्ये गुणणनीयमेवं तेपीत्यर्थः। ननु अव्यये
भ्यो निः संख्येभ्यः कृयं स्यादिघइति चेत्। वक्रष्ववऽवचनमित्यादीनां पदैकवाक्यता स्वादिविधिविधाके न तस्मान्निः कारकेभ्यो निः राम
संख्येभ्यश्च। अव्ययेभ्योम्पादाप्सु पइति लुग्वधान। लिंग। त्यादयो भवंतीत्यावश्यमस्युपेयं तथा सति प्रत्ययलक्षणेन पदसे ७०

णा सिध्यति नान्यथा यथा पदाच स्वादिविधिवाक्येन बहुषु बहुवचनमित्यादेर्विध्यवाक्यतापन्नत्वादानि यत्र पदे तु ल्यजातीयस्य
नियमेन व्यावृत्तेर्बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोर्द्विपोरेव द्विवचनं नैकस्मिन्न बहुष्विति स्येवं तुल्यजातीयस्य नियमेन व्यावृत्ते
रसंख्येयोपस्थापेभ्यः स्वादीनामुदयः प्राप्त एव तामि वन हेभ्यः विधिपदे तु यत्र संख्याया वाच्यता संभवति तत्र तस्या वाच्यत्वे
न विधिरित्यव्ययेभ्यः समान्यविहिताः स्वाद्यः संख्येवेतिदिक्॥ अजादिषु विशिष्टेषु यदाकारो विनश्यति। मातिमानिहतत्को
वा विधासंकर्तुमर्हति॥ ३॥ अतुततपः प्रभावादिविशिष्टेष्वजादिषु ब्रह्मादिष्वपि यत्पस्माद्दाकारो विनश्यति तस्माद्दिवे
कीटजलजन्तुदोपमे मनुष्याद्याकारेऽस्मिन्माने स्थैर्यधियं चापहाय तदर्थमकार्यं पुत्रमित्रादावासक्तिं च विहाय सीतापति
परमेश्वर एव भावं निदधीतेत्यर्थः। उक्तं च। वासिष्ठे रामायणे। लीलाविग्रहधारिणा नक्रानुग्रहकारिणा निशाचरनि
वारिणा भगवता रामभद्रेण येषां निमेषोन्मेषाभ्यां जगतां प्रलयोदये। तादृशाः पुरुषा याता मन्मादृशां गणनैव का तडित्सु
शरदभ्रेषु गन्धर्वगगनेषु च। स्थैर्यं येन विनिर्णीतं स विश्वसितु विग्रहे इति। उक्तं च महाभारते। इदं कृतमिदं कार्यमिदमन्यत्कृ
ताकृतं। एवमीहासमायुक्तं कृतान्तः कुरुते वशे। कृत्वा कार्यमकार्यं वा पुष्टिमेषां प्रयच्छति। ते पुत्र पशु मित्रार्थे संसक्तमन
सं नरं क्रूरं। व्याघ्रः पशुमिवारण्ये मृत्युरादाय गच्छति। तरुणनिलनदीवेगस्वप्नसंकाशवृत्तिषु। आयुष्यौवनभोगेषु प्राज्ञः को
नाम विश्वसेत्। दह्यमानेऽपि लोकेऽस्मिन्महता कालवह्निना॥ कोलमेतद्धत्ते प्राज्ञः प्रदीप्तादिव वेश्मनि। सर्वशास्त्राप्रमाथि

७१

नीसर्वोपापविनाशिनी। अप्रमाता प्रमतानां नन्दांगना गत्वि नित्यता। व्याकरणपक्षे तु आतो लोप इटि चेत्यजादिषु ङिद्वि
षे ष्टगोद इत्याद्याचाकारलोपविधानादिहाकारे विश्वासस्थेयीयिय ते कुर्यादित्यर्थः। अत्र वक्तव्यमुक्तं पाणिनिसूत्रयो। अथ प्र
यसमाप्तिमामिसे ध्यापशास्त्रं तस्य त्र मकारद्वयात्मकमुपद्दिपंक्तघाजेन मुक्तिं निरूपयति। संहृतं यदिमगोधसंततं संगतं निगत
ममो लि चिंतया। तत्स्वरूपमधिगम्यनिर्दिष्टो वर्णावद्भवति कोनकोविदः ४ कृत्स्नमवर्णो संहृतं प्रयत्नमेवकार्यार्थे पुनरशास्त्रे तस्य
विवृतत्वेनोपदेशस्तत्र वर्णद्वयात्मकेच पक्षाम्नाणां तत्सूत्रे तद्विचारणायां पुनः संहृतत्वरूपप्रत्यापत्तिस्तस्य प्रयोगे संवृतत्वे
वो चारणार्थे भवति। तथा च यथा संहृतो प्यकारः कोन चित्कारणेन विवृततां प्रापितो पि पुनर्निगमो तच्चिंतापाठे दोवस्तत्राणित्यति
देशान्निगमो वेदांगसूत्रसमुदायस्तन्मौलिरकारद्वयात्मकम् [illegible] पतिमे सूत्रे तद्विचारणायां स्वरूपे प्राप्यते तथा वस्तुतो ब्रह्मै
व सत्र निर्वचनीयानाद्यविद्याविलासेन जीवतां गतः कोविदः पंडितो मननोपदिसंहृतं विषयाभिलाषशून्यं जातं तदा तत्त्वमसी
त्यादि वेदांतवाक्यविचारणया पुनः स्वस्वरूपसंखंडानंदमयमधिगम्य निर्दृष्टो वीतशोकः कोनस्यादित्यर्थः। अत्र संहृते मनइ
त्यनेन शमदमभादिसंपत्तिर्नित्यानित्यविवेकइहामुत्रफलभोगविरागो मुमुक्षुत्वं चेति साधनचतुष्टयसंपत्तिरुक्ता भवति। अप्रश
ब्देन साधनचतुष्टयसंपत्तेः दानंतर्ये वेदांतवाक्यविचारस्यानिहितमितिदिक्। नत्तु अ अ इति सूत्रेण विवृतस्यस्या निनः पुनः
संहृतः प्रयोगे क्रियते तर्हि विवृतोपदेशस्य किं कार्यं। न च दूत्वा स्याद्देव दत्ता इ स्मा दोद्ध स्यपदी र्घप्लुतयोर्विधाने संवृतस्य संवृ

राम
७१

तावेव तौ मा भूतामित्येवमर्थं विवृतत्वोपदेश इति वाच्यं। लोकवेदयोः संवृतयोर्दीर्घप्लुतयोरभावेन विधानसामर्थ्याद्विवृ
तविधानस्यैव संभवादिति चेत्। अकारस्य दीर्घप्लुताभ्यां विवृताभ्यां सवर्णसंज्ञैव विवृतोपदेशोद्देश्यस्य प्रयोजनं अन्यथा
संवृतस्य तस्य प्रयत्नभेदात्तास्यान्नवर्ण्याचाकः सवर्णे दीर्घ इति दण्डाग्रमित्यादावेव स्यान्न तु दण्डाढकमित्यादौ ततश्च प्रयो
गे संवृतस्यैवोच्चारणार्थं प्रत्यापत्तिवचनं विवृतत्वोपदेशस्तुल्यास्यानादरवसेयः यद्वा क्रियमाणं प्रत्यापत्तिवचनमेवेदमकार
स्य ह्रस्वस्य विवृतत्वेन प्रतिज्ञानमस्तीति ज्ञापयति। स्वरूपाप्रच्युतस्य पुनः स्वरूपप्राप्तये यत्नो व्यर्थ इति ज्ञापनमेव प्रत्यापत्तेः
प्रयोजनं। नन्वतिखट्वः इत्यादाविवाकारस्य ह्रस्वत्वेऽप्यमानो विवृतः प्राप्नोति संवृतो यथा स्यादेवमर्थो प्रतिपत्तिरिति चेत्। लोकवेदयो
रपि विवृतोकारो नास्तीति संवृतस्यैव विधानं भविष्यति। ननु अ अ इति सूत्रे णको विवृतः स्थान्यकारस्तस्याणत्वात्सवर्णानां ग्रा
हकत्वे दीर्घप्लुतयोरपि स्थाने संवृतोकारः प्राप्नोतीति चेत्। आदेशस्य विवृताकारस्यानणत्वात् ज्ञाप्यमानत्वाद्भूसवर्णाग्रा
हकत्वाभावाद्भावितयोर्ह्रस्वस्य ह्रस्वो भविष्यतीनदीर्घादेः। ह्रस्वेवमादेशस्य संवृतस्यानणत्वात्सवर्णाग्राहकत्वेपि अणु
पुरुः संवृत उच्चरितत्वे गुणएव त्रयाणां ह्रस्वदीर्घप्लुतानां प्राप्नोति न तदानुदात्तस्वरितोऽनुनासिक एकश्रुत्यते सवर्णगु
णपुरुषस्य माऽत्रिकस्य प्रत्यापत्तिरिति चेत्। उच्यते। अत इति तपरकरणं कर्तव्यं। तत्र तः परो यस्मादिति पूर्वः स्थान्यकारस्त
परो भिन्नकालो भिन्नकालनिवृत्त्यर्थं च तपरकरणमिति दीर्घप्लुतौ न ग्रहीष्यतः आदेशोऽपि द्वितीयोकारस्तात्परस्तपर इ

त्रिसत्कालानां गुणानां तरयुक्तानां ग्रहाणां यैतपरत्वं तत्रेति तेषां ग्रहकोऽभविष्यति। अथवा एकदेशनिर्दिश्येतेनमात्रिकाः
षडकाराः अपि स्थानिनोनिर्दिश्येतेतथादेशाः अपिषडेवतथाचषण्णां स्थानिनां निर्देशसामर्थ्यात् त्रिकालग्रहणात्तेनि
भाविष्यति। विहृतानांच षण्णां स्थानिनां से हृताः षडादेशाभविष्यति। केचित्तु द्वावपि तपरावदिति पठनीयाविति सर्वं मिदं
सिद्धं। अधिकंतु प्रयोजनमस्मादेनिरूपितं॥ प्रयोजनः कलितमत्सरएवं सन्तः कुत्रापितेपरगुणैः परितोषवंतः त्वत्कारितेननत
देनमिवं वने नसीतामहायपरितुष्य परत्वमेव॥१॥ मंदाम हाग्राष्यम हार्णवं येतरीतुमुद्बलमसंनशक्ताः। तत्रापनीतैः कृ
७४ पपा तदर्थं विलासवापीरचिता मेये॥२॥ सुजनानां स्वभावेन गुणे स्नेहः सदेहिवां। जायते गुणगुणे द्वेषो द्विषोखिद्युरात्मनां॥३॥
मंदानां मादृशामेव कृतेयं संग्रहः कृतः स्फुरत्सकलशास्त्रार्थ तन्मामुपहसंतुमा॥४॥ यावेकृतांजलिपुटोभवतो दयालुनालो
कितेनभवतांहृतदूषणेना। पत्नीवदाशरथिनेवसुमनेः समदोषायेयाकृतिः सगुणतां कवयः क्रियांतु॥५॥ श्रीविश्वनाथस्
नो रुक्मिनग्रस्परामचंद्रस्य सुधियः शोभयंत्येतामुत्सारितमत्सराः सहर्षे॥६॥ दोषप्रीतिर्मतो दोषा गुणप्रीतिमतो गु
णाः (द्दष्टे) पाततिकस्तत्र विषादोहर्षं एववा॥७॥ आनंदयेत्सुकृतिनः कृतिरियमवधीरिताखलैर्यद्यपि। किलसतितन्दपाल राम
मोलोचंपकम लिनावहेलितं तदपि॥८॥ ग्रामेप्रकाशास्तविधौविलालेविश्वेशयुक्तो। स्तिमठेरमेशः। तस्यात्नय मंदधि ७२
या मया यं ग्रंथः कृतस्सुकृतेपितु ज्ञातः॥९॥ प्रासप्रोक्तिरशेषवाण्मयविषये श्रीविश्वनाथः सुधीयधीमंतमस्तूतशोभनतमा

रंभाचरं नाम युतं ॥ श्रीसप्यामरत्नस्य पाधुविहितो श्रीरामचंद्राभिधाना ज्ञस्तस्य कृतौ समाप दचिरा दुल्लासपरवोतिम.। इति
श्रीमदनेकविद्वद्वृंदतेवासिवंदितपादारविंदस्य भट्टविश्वनाथस्य तनयेन श्रीरामचंद्रचरणकमलोपासिना प्रकाशावत्रिहि
तां विलालयामवासिना रामचंद्रेण निर्मितायां स्वकृतसप्यामरणपंजिकायां सप्तदशमालायां मंतिम उल्लासः समाप्तः ॥
समाप्तो यं ग्रंथः सीतापतेः सप्रसादात ॥ श्रीरस्तु जगतः ॥ ॥ ॥ संख्या २६७५

राम
७३

73

॥ सभ्याभरण स्यादः ॥